the peacock, shaking off sleep, quits the Darbha-grass thatch of the cottage; and yonder the antelope, rising hastily from the border of the altar impressed by his hoofs, afterwards raises himself on high, stretching his limbs. Moreover, after planting his foot on the head of Sumeru, lord of mountains, the Moon, by whom, dispersing the darkness, the central palace of Vishṇu has been invaded, even he, descends from the sky with diminished beams. The highest ascent of the great terminates in a fall.'

[1] 'With a hurried toss of the curtain.' *Paṭākshepeṇa* (so read all the Deva-n. MSS. and K.) is from *paṭa*, with the same sense as *apaṭī*, i. e. the curtain separating the stage from the *nepathya* (see p. 3, n. 2) and *ākshepa*, 'tossing aside.' The Beng. reading is *apaṭī-kshepeṇa*. *Paṭākshepeṇa*=*yavanikāpanodanena*, K.; =*akasmāt*, 'suddenly,' S'. According to K., the entrance of an actor under the influence of flurry caused by joy, sorrow, or any other emotion (*harsha-śokādi-janita-sambhrama-yuktasya*) is made with a toss of the curtain.

[2] 'It is not unknown to this person [myself], however withdrawn (she may be) from worldly concerns, that an indignity has been wrought towards S'akuntalā by that king.' *Evaṃ nāma* is the reading of the Mackenzie MS., supported by K. *Na etat na viditam* is given on the authority of K. *Imassa* is inserted from the old MS. (India Office, 1060); S'. has *amushya janasya*. The other Deva-n. MSS. read *yady api nāma vishaya-parān-mukhasyāpi janasya etan na viditaṃ tathāpi tena*, &c. The margin of the Beng. MS., as well as that of Chézy, has a note referring *vishaya-parān-mukhasya janasya* to Kaṇva; but a comparison of other passages shews that by *ayaṃ janaḥ* the person or persons speaking are commonly intended (cf. p. 125, l. 6, and p. 156, l. 12). *An-āryam*, lit. 'anything unworthy or dishonourable,' 'ungentlemanly conduct,' i. e. according to S'. and Ć., *Śakuntalā-vismaraṇa-rūpam*, 'consisting of the forgetting of S'akuntalā.'

शिष्यः ।

यावदुपस्थितां होमवेलां[1] गुरवे निवेदयामि । ॥ इति निष्क्रान्तः ॥

अनसूया ।

[a] पडिबुद्धावि किं करिस्सं । ण मे उइदेसुवि णिअकरणिज्जेसु हत्थपाआ पसरन्ति । कामो दाणिं सकामो होदु । जेण असच्चसन्धे जणे सुद्धहिअआ सही पदं कारिदा[2] । अहवा दुव्वाससाबो एसो विआरेदि[3] । अण्णहा कहं सो राएसी तारिसाणि मन्तिअ एत्तिअस्स कालस्स लेहमत्तम्पि ण विसज्जेदि । ता इदो अहिण्णाणं अङ्गुलीअअं से

[a] प्रतिबुद्धापि किं करिष्यामि । न म उचितेष्वपि निजकरणीयेषु ह स्तपादाः प्रसरन्ति । काम इदानीं सकामो भवतु । येनासत्यसन्धे जने शुद्धहृदया सखी पदं कारिता । अथवा दुर्वासःशाप एष विकारयति । अन्यथा कथं स राजर्षिस्तादृशानि मन्त्रयित्वैतावतः कालस्य लेखमात्रमपि न विसर्जयति । तस्मादितोऽभिज्ञानमङ्गुलीयकमस्य

---

[1] 'The time for (making) the burnt-offering;' see p. 148, n. 1.

[2] 'Although wide-awake, what shall I do? My hands and feet do not move-freely in their own usual occupations. Let Love now be possessed of his wish [enjoy his triumph], by whom our innocent-minded friend has been made to place confidence in that perfidious man.' *Ućiteshu karaṇīyeshu*, such as 'gathering flowers,' &c., S'. *Sa-kāmaḥ=kṛitārthī*, 'one who has attained his end,' S'. (cf. *bhavatu paṅća-vāṇaḥ kṛitī*, Vikram., Act II). *Asatya-sandha*, lit. 'one who is not true to his contract (*sandhā*);'=*asatya-pratijña*, S'.;=*mithyā-pratijña*, Ć. *Śuddha-hṛidayā* is the reading of two Deva-nāgarī MSS. and of the Bengālī. *Pada=sthāna*, 'a place,' S'.; =*vyavasāya* or *vyavasiti*, 'industry,' 'application,' 'business,' Ć. and Amara-k. Hence *padaṃ kṛi* in the causal must mean 'to cause to have dealings or transactions with,' 'to cause to apply one's self,' 'to cause to take up a station;' whence may easily flow the interpretation, 'made to trust.' Cf. a similar phrase in Kumāra-s. vi. 14, where also the commentators explain *pada* by *vyavasāya*.

[3] 'Or rather, it is the curse of Durvāsas that has caused the change.' *Athavā*, see p. 24, l. 10; p. 30, n. 3. *Vikārayati*, see p. 130, n. 1.

[a] विसज्जेम । दुक्खसीले तवस्सिजणे को अब्भत्थी-अदु । णं सहीगामी दोसोत्ति ववसिदावि ण पारेमि पवासपडिणिउत्तस्स तादकस्सवस्स दुस्सन्दपरिणीदं आ-वण्णसत्तं सउन्दलं णिवेदिदुं । इत्थंगए अम्हेहिं किं करणिज्जं ।[1]

प्रियंवदा ॥ प्रविश्य । सहर्षम् ॥

[b] सहि । तुवर तुवर सउन्दलाए पत्थाणकोदुअं णिव्वत्तिदुं ।[2]

अनसूया ।

[c] सहि । कहं एदं ।

[a] विसर्जयावः । दुःखशीले तपस्विजने कोऽभ्यर्थ्यताम् । ननु सखीगामी दोष इति व्यवसितापि न पारयामि प्रवासप्रतिनिवृत्तस्य तातकाश्यपस्य दुष्यन्तपरिणीतामापन्न-सत्त्वां शकुन्तलां निवेदयितुम् । इत्थंगतेऽस्माभिः किं करणीयम् । [b] सखि । त्वरय त्वरय शकुन्तलायाः प्रस्थानकौतुकं निर्वर्तयितुम् । [c] सखि । कथमेतत् ।

---

[1] 'Among ascetics inured-to-hardships, who is to be solicited (to carry the ring to the king)? Assuredly, even though I were convinced that blame was attributable to Śakuntalā, I should not have the power to make known to father Kāśyapa, (just) returned from his pilgrimage, that Śakuntalā is married to Dushyanta, and is pregnant. Such being the case, what is to be done by us?' *Duḥkha-śīle*, so read all the Deva-n.; the oldest Bengālī, supported by Ć., has *nirduḥkha-śītale*. *Sakhī-gāmin*, see p. 42, n. 2. *Vyavasitā*, past pass. part. of *vy-ava-so*, 'to determine,' 'resolve,' 'strive;' also 'to be persuaded,' 'convinced,' as in Rāmāy. ii. 12, 61, *satīṃ tvāṃ vyavasyāmi*. *Pārayāmi* is either the causal form of *pṛi*, meaning 'to conduct across,' 'bring over,' 'accomplish,' 'fulfil,' and thence 'to be able,' or is a nominal from *pāra*, 'the opposite bank (of a river),' 'the other side,' 'the end.' *Itthaṃ-gate*, i. e. *evam-prāpte karmaṇi*.

[2] 'Hasten to celebrate [complete] the festivities at the departure of Śakuntalā.' *Prasthāna-kautuka=prayāṇa-maṅgala*, 'festive solemnities which take place at the departure of a member of the family.'

प्रियंवदा ।

[a]सुणाहि दाणिं । सुहसइदं पुच्छिदुं[1] सउन्दलासआसं गदम्हि ।

अनसूया ।

[b]तदो तदो ।

प्रियंवदा ।

[c]दाव एणं लज्जावणदमुहिं परिस्सजिअ सअं ताद्कस्सबेण एवं अहिणन्दिदं । दिट्ठिआ । धूमाउलिद्दिट्ठिणोबि जअमाणस्स पाअए एव्व आहुदी पडिदा[2] । वच्छे । सुसिस्सपरिदिण्णा विअ विज्जा असोअणिज्जा संवुत्ता । अज्ज एव्व इसिपडिरक्खिदं तुमं भत्तुणो सआसं विसज्जेमित्ति[3] ।

[a] शृणुदानीम् । सुखशयितं प्रष्टुं शकुन्तलासकाशं गतास्मि । [b] ततस्ततः । [c] तावदेनां लज्जावनतमुखीं परिष्वज्य स्वयं तातकाश्यपेनैवमभिनन्दितम् । दिष्ट्या । धूमाकुलितदृष्टेरपि यजमानस्य पावक एवाहुतिः पतिता । वत्से । सुशिष्यपरिदत्तेव विद्याशोचनीया संवृत्ता । अद्यैव ऋषिप्रतिरक्षितां त्वां भर्तुः सकाशं विसर्जयामीति ।

---

[1] 'To inquire (whether she had had) a comfortable sleep.' *Pucchidum* for *prashṭum*, so reads my own Bombay MS., supported by a parallel passage in Mālavik. 44, 7, *suham pucchidum āgatā*. The other Deva-n. have *suha-saida-pucchiā* for *sukha-śayita-pracchikā*, which is given as another reading in Mālavik. Dr. Boehtlingk remarks that the agent may be used with the sense of a fut. part. active, and refers to Pāṇ. iii. 3, 10.

[2] 'By father Kaṇva [see p. 22, n. 3] having of his own accord embraced her whilst her face was bowed down with shame, she was thus congratulated [congratulation was made], "Hail (to thee)! the oblation of the sacrificing priest, although his sight was obscured by the smoke, fell directly into the fire;"' see n. 3 below. *Dhūmākulita*, cf. p. 65, l. 7. *Yajamāna*, see p. 95, n. 1.

[3] 'My child, as knowledge delivered over to a good student (is not to be deplored, so has it) come to pass that thou art not to be sorrowed for. This very day I dismiss thee protected by [under the escort of some]

अनसूया ।

[a] अह केण सूइदो तादकस्सवस्स वुत्तन्तो ।

प्रियंवदा ।

[b] अग्गिसरणं पविट्ठस्स सरीरं विणा छन्दोमईए वाआए[1] ।

[a] अथ केन सूचितस्तातकाश्यपस्य वृत्तान्तः । [b] अग्निशरणं प्रविष्टस्य शरीरं विना छन्दोमय्या वाचया ।

Ṛishis to the presence of (thy) husband.' Compare Manu ii. 114, 'Learning having approached a Brāhman said to him, "I am thy divine treasure, deliver me not to a scorner, but communicate me to that student who will be a careful guardian of the treasure."' The Beng. and K. insert *me* before *aśocanīyā*, and read *parigṛihītām* for *pratirakshitām*.

[1] 'By an incorporeal [without body, without visible speaker] metrical speech (addressed to him from heaven), when he had entered the fire-sanctuary.' *Śarīraṃ vinā*, i. e. *ākāśe Sarasvatyā niveditaḥ*, 'he was informed by Sarasvatī (by a voice) in the sky,' S.; see p. 96, n. 3. *Agni-śaraṇa=agny-āgāra*, 'the place where the sacred fire was kept;'=*yajña-śālā*, 'hall of sacrifice.' Fire is an important object of veneration with the Hindūs, almost as much so as with the ancient Persians. Perhaps the chief worship recommended in the Vedas is that of Fire and the Sun. According to Manu, Brāhmans when they married and became householders, were to kindle with two pieces of the hard Śamī, Araṇi, or Khadira wood, or with a piece of the Śamī and Aśvattha wood (see p. 23, n. 1), a sacred fire (*homāgni*, *gṛihyāgni*, *hutāgni*), which they were to deposit in a cavity or hearth called *agni-kuṇḍa* or *vitāna* (Indian Wisdom, p. 197), in some hallowed part of the house (or, like the Persians, in some sacred building proper for the purpose) called *agny-āgāra* (Manu iv. 58), *homa-śālā*, *agni-gṛiha*, and which they were to keep lighted throughout their lives, using it first for their nuptial ceremony (Manu ii. 231, iii. 171); and for the regular morning and evening oblations to Agni (*homa*, *hotra*), performed by dropping clarified butter &c. into the flame, with prayers and invocations (Manu xi. 41, iii. 81, 84, 85; see also p. 133, n. 1 of this play); for the performance of solemn sacrifices (Manu ii. 143); for the Śrāddha or obsequies to departed parents and ancestors (Manu iii. 212 sqq.; see also p. 111, n. 1 of this play); and, finally, for the funeral pile. The perpetual maintenance of this sacred fire was called *agni-hotra*, *agny-ādhāna*, *agni-rakshaṇa;* and the consecration of it, *agny-ādheya*

अनसूया ॥ सविस्मयम् ॥

[a] कहेहि ।

प्रियंवदा ॥ संस्कृतमाश्रित्य ॥

दुष्यन्तेनाहितं तेजो दधानां भूतये भुवः ।
अवेहि तनयां ब्रह्मन्नग्निगर्भां शमीमिव [1] ॥ ८४ ॥

[a] कथय ।

(Manu ii. 143); and the Brāhman or householder who maintained it, *agni-hotrin, āhitāgni, agny-āhita, sāgnika*. At Benares even to this day many Agni-hotras are kept burning. Sometimes the householder did not himself attend to the sacred fire, but engaged an officiating priest (*ṛitvij, yajamāna, agnīdhra*, see p. 95, n. 1; p. 96, n. 2). The Brāhman who did not maintain a fire was called *an-āhitāgni* (Manu xi. 38). According to Manu iii. 212 (with commentary) there were three periods when he was necessarily without it, viz. just before his investiture, before his marriage after the completion of his studentship, and at the death of his wife; but the usual daily oblation was then to be placed in the hand of a holy Brāhman, who is said to be one form of fire (see p. 74, n. 3; p. 50, n. 2). Sacred fire is sometimes considered to be of three kinds (*tretā*, 'the triad of fires'): 1. *Gārhapatya*, 'nuptial or household;' 2. *Āhavanīya*, 'sacrificial,' taken from the preceding; 3. *Dakshiṇa*, 'that placed towards the south,' taken from either of the former; see Manu ii. 231. The man who maintained all these three was called *tretāgni*. See Indian Wisdom, p. 198, n. 1.

[1] '[*Having recourse to Sanskrit.*] Know that (thy adopted) daughter, O Brāhman, has conceived a glorious-germ [seed] implanted [lodged, deposited] by Dushyanta for the welfare of the earth, as the Śamī-tree is pregnant with fire.' *Śamī*, 'a kind of thorny acacia' (see the last note, and p. 23, n. 1). The legend is that the goddess Pārvatī, being one day under the influence of strong passion, reposed on a trunk of this tree, whereby an intense heat was generated in the pith or interior of the wood, which ever after broke into a sacred flame on the slightest attrition. *Āhita=arpita. Tejaḥ=śukra*, Ć. (cf. Raghu-v. ii. 75; Megha-d. 45.) 'By this it was indicated that Śakuntalā would have a son in glory equal to Agni,' Ś.

Verse 84. Śloka or Anushṭubh. See verses 5, 6, 11, 12, 26, 47, 50, 51, 53, 73, 76.

अनसूया ॥ प्रियंवदामाश्लिष्य ॥

[a]सहि। पिअं मे। पिअं मे। किन्दु अज्ज एव्व सउन्दला णीअदित्ति उक्कण्ठासाहारणं परितोसं अणुहोमि[1]।

प्रियंवदा।

[b]सहि। वअं दाव उक्कण्ठं विणोदइस्सामो। सा तवस्सिणी णिव्वुदा होदु[2]।

अनसूया।

[c]तेण हि एदस्सिं चूदसाहावलम्बिदे णारिएरसमुग्गए एतण्णिमित्तं एव्व कालन्तरक्खमा णिक्खित्ता मए केसरमालिआ। ता इमं हत्थसण्णिहिदं करेहि[3]। जाव अहम्पि से

[a] सखि। प्रियं मे। प्रियं मे। किन्वद्यैव शकुन्तलां नीयत इत्युत्कण्ठासाधारणं परितोषमनुभवामि। [b] सखि। आवां तावदुत्कण्ठां विनोदयिष्यावः। सा तपस्विनी निर्वृता भवतु। [c] तेन हि एतस्मिंश्चूतशाखावलम्बिते नारिकेरसमुद्गक एतन्निमित्तमेव कालान्तरक्षमा निक्षिप्ता मया केशरमालिका। तदिमां हस्तसन्निहितां कुरु। यावदहमप्यस्यां

---

[1] 'O friend, how pleased I am! but when I think that this very day Śakuntalā is being conveyed away (to her husband's house), I feel a satisfaction mingled with regret.' *Iti*, 'so thinking,' see p. 140, n. 2. *Utkaṇṭhāsādhāraṇa*, lit. 'in common with regret or sorrow.' 'I am partly glad, partly sorry,' Ś.

[2] '(Only) let this (our) poor-sister be made happy.' *Tapasvin*, 'a devotee,' also denotes 'a person in a pitiable state,' 'a poor wretch.' *Nirvṛitā=susthita-chittā*, Ś.

[3] 'Therefore in this cocoa-nut box, suspended on a bough of the mango, a Keśara-garland, capable of (keeping fresh for) the intervening period, was with this very object deposited by me. Therefore make it rest on (my) hand [take it down and give it to me].' *Nārikera* or *nārikela*, 'the cocoa-nut,' 'the fruit of the cocoa-nut tree.' *Chūta* or *āmra*, 'the mango tree.' *Kālāntara-kshamā=virala-kāla-sthāyinī*, Ś. *Keśara-mālikā*, 'a wreath made of the flowers of the Bakula,' see p. 26, n. 1. This was

[a] मिअलोअणं तित्थमित्तिअं दुव्वाकिसलआणित्ति मङ्गलसमालम्भणाणि विरएमि[1]।

प्रियंवदा।

[b] तह करीअदु।

॥ अनसूया निष्क्रान्ता। प्रियंवदा नाट्येन सुमनसो गृह्णाति ॥

नेपथ्ये।

गौतमि। आदिश्यन्तां शार्ङ्गरवमिश्राः[2] शकुन्तलानयनाय।

[a] मृगरोचनां तीर्थमृत्तिकां दूर्बाकिसलयानीति मङ्गलसमालम्भनानि विरचयामि।
[b] तथा क्रियताम्।

---

probably a *mangala-pushpa-mayī srak*, or 'garland made of auspicious flowers,' to be suspended round the neck of Śakuntalā, such as that described in Raghu-v. vi. 84. Ś. and the Beng. read *keśara-guṇḍāḥ* or *keśara-ćūrṇāḥ*, and Ś. observes that the fragrant dust of this plant is much used by women in making unguents (*udvartanāni*).

[1] 'Whilst I also will compound auspicious unguents composed of Mṛiga-roćanā, holy earth, (and) Dūrbā sprouts.' *Mṛiga-roćanā* is said to be either the concrete bile of a deer or an exudation from his head, used as a medicine, a yellow dye or a perfume (see *go-roćanā* in Dict.) The latter word is the reading of the Beng. MSS. *Tīrtha-mṛittikā* is earth brought from Tīrthas or holy bathing-places (see p. 17, n. 1). *Dūrbā* or *dūrvā*, 'bent-grass,' a kind of sacred grass, not quite so sacred as *darbha*, but possessing many virtues, and used for the *argha* (see p. 36, n. 2). Sir W. Jones says of it, 'Its flowers, in their perfect state, are among the loveliest objects in the vegetable world, and appear, through a lens, like minute rubies and emeralds. It is the sweetest and most nutritious pasture for cattle, and its usefulness, added to its beauty, induced the Hindūs to believe that it was the mansion of a benevolent nymph.' *Samālambhana* is the act of smearing the body with coloured perfumes, such as saffron, sandal, &c.; the plural is here used for the unguents themselves, which are said to be *mangala*, 'conducive to good fortune.' The Beng. have *samālambhanam*.

[2] 'Śārngarava and the (other) good-people;' see p. 7, n. 3. The Beng. have *Śārngarava-śāradvata-miśrāḥ*. According to Ś. and Ć. these were the names of two *śishyāḥ*, 'religious students,' pupils of Kaṇva.

प्रियंवदा ॥ कर्णं दत्त्वा ॥

[a] अणसूए । तुवर तुवर । एदे खु हत्थिणाउरगामिणो इसीओ सद्दावीअन्ति[1] ।

अनसूया ॥ प्रविश्य समालम्भनहस्ता ॥

[b] सहि । एहि । गच्छम्ह । ॥ इति परिक्रामतः ॥

प्रियंवदा ॥ विलोक्य ॥

[c] एसा सुज्जोदए एव्व सिहामज्जिदा पडिच्छिदणीवार-हत्थाहिं सोत्थिवाअणकाहिं तावसीहिं अहिणन्दीअमाणा सउन्दला चिट्ठइ[2] । उवसप्पम्ह णं । ॥ इत्युपसर्पतः ॥

[a] अनसूये । त्वरय त्वरय । एते खलु हस्तिनापुरगामिन ऋषयः शब्दायन्ते । [b] सखि । एहि । गच्छावः । [c] एषा सूर्योदय एव शिखामार्जिता प्रतिष्ठितनीवारहस्ताभिः स्वस्तिवाचनिकाभिस्तापसीभिरभिनन्द्यमाना शकुन्तला तिष्ठति । उपसर्पाव एनाम् ।

---

[1] 'Truly these Ṛishis who are to go to Hastināpur are being called.' *Śabdāyyante=āhūyante*, S. and Ć. It is the passive form of the nominal *śabdāyate;* S. has *śabdāyante*, which would properly mean 'they sound,' 'make a noise,' Pāṇ. iii. 1, 17. *Hastināpura*, 'city of elephants,' was the ancient Delhi, situated on the Ganges, and the residence of Dushyanta.

[2] 'There stands Śakuntalā at earliest sunrise, with her locks combed-and-washed, in the act of being congratulated by the holy-women, (having) consecrated wild-rice in their hands, (and) invoking-blessings-with-their-offerings.' *Śikhā-mārjitā*, lit. 'having her top-knot combed and cleansed,' a compound similar to *śiraḥ-snāta*, 'having the head bathed.' The Beng. MSS. have *kṛita-majjanā*. *Svasti-vāćanikābhiḥ* is here an epithet of the women who make the *svasti-vāćana*, i. e. according to K. 'a gift of flowers, sweetmeats (*prahelaka*), fruit, or any eatables presented with good wishes and prayers for the blessing of some deity.' It is especially the blessing which is coupled with the gift. In the present case the hallowed rice which they held in their hands, might have constituted the offering which accompanied the *svasti-vāćana*. In Vikram. the Vidūshaka is propitiated by a *svasti-vāćana* (or *-naka*), consisting of a *modaka-śarāva*, 'dish of sweetmeats.' Birthday-gifts, wedding-presents, Christmas-boxes,

॥ ततः प्रविशति यथोद्दिष्टव्यापारासनस्था शकुन्तला ॥

तापसीनामन्यतमा ॥ शकुन्तलां प्रति ॥

[a] जादे । भत्तुणो बहुमाणसूअअं महादेईसद्दं लहेहि[1] ।

द्वितीया ।

[b] वच्छे । वीरप्पसविणी होहि ।

तृतीया ।

[c] वच्छे । भत्तुणो बहुमदा होहि ।

॥ इत्याशिषो दत्त्वा गौतमीवर्जं निष्क्रान्ताः ॥

सख्यौ ॥ उपसृत्य ॥

[d] सहि । सुहमज्जणं दे होदु[2] ।

शकुन्तला ।

[e] साअदं मे सहीणं । इदो णिसीदह ।

उभे ॥ मङ्गलपात्राण्यादाय[3] । उपविश्य ॥

[f] हला । सज्जा होहि । जाव मङ्गलसमालम्भणं विरएम ।

[a] जाते । भर्तुर्बहुमानसूचकं महादेवीशब्दं लभस्व । [b] वत्से । वीरप्रसविनी भव । [c] वत्से । भर्तुर्बहुमता भव । [d] सखि । सुखमार्जनं ते भवतु । [e] स्वागतं मे सखीभ्याम् । इतो निषीदतम् । [f] हला । सज्जा भव । यावन्मङ्गलसमालम्भनं विरचयावः ।

&c., with their accompanying compliments, are the *svasti-vāćanaka* of our day. The words *vāyana* and *vāyanaka* seem to have a similar signification, though without any necessary implication of *good-wishes*. *Nīvāra*, 'wild-rice,' Manu vi. 16.

[1] 'My child, take the title of "Great Queen," indicative of the high esteem of (thy) husband.' *Jātā*, 'a child,' is used affectionately in addressing any young female. *Mahā-devī*, 'chief queen;' cf. p. 124, n. 1.

[2] 'May it be to thee an auspicious ablution!' i. e. may it bring thee good fortune! May it be an omen of happiness to thee!

[3] 'Taking up the propitiatory-vessels,' i. e. the vessels containing the flowers, unguents, &c., intended to propitiate Fortune in favour of Śakuntalā. So read all the Deva-n. MSS., excepting one (Colebrooke's), which has *patrāṇi*.

शकुन्तला ।

[a] एदम्पि बहुमन्तव्वं । दुल्लहं दाणिं मे सहीमण्डणं भविस्सदि[1] । ॥ इति वाष्पं विसृजति ॥

उभे ।

[b] सहि । उइदं ण दे मङ्गलकाले रोइदुं । ॥ इत्यश्रूणि प्रमृज्य नाट्येन प्रसाधयतः ।

प्रियंवदा ।

[c] आहरणोइदं रूवं अस्समसुलहेहिं पसाहणेहिं विप्पआरीअदि[2] ।

॥ प्रविश्योपायनहस्तावृषिकुमारकौ ॥

उभौ ।

इदमलङ्करणम् । अलङ्क्रियतामचभवती ।

॥ सर्वौ विलोक्य विस्मिताः ॥

गौतमी ।

[d] वच्छ णारअ । कुदो एदं ।

प्रथमः ।

तातकाश्यपप्रभावात् ।

[a] एतदपि बहुमन्तव्यम् । दुर्लभमिदानीं मे सखीमण्डनं भविष्यति । [b] सखि । उचितं न ते मङ्गलकाले रोदितुम् । [c] आभरणोचितं रूपमाश्रमसुलभैः प्रसाधनैर्विप्रकार्यते । [d] वत्स नारद । कुत एतत् ।

---

[1] 'This (friendly service of yours) too ought to be highly valued (by me). The being attired by (you) my friends, will now be a rare occurrence. [*So she sheds tears.*]' *Visṛijati* is the reading of my own Deva-n. MS.; the others have *viharati.*

[2] '(Thy) person worthy of (the costliest) ornaments is slighted [or disfigured] by decorations easily procured in a hermitage,' i. e. thy beauty, which deserves to be set off by golden ornaments, &c., is impaired by such decorations as sprouts of Dūrvā grass, &c., S. *Viprakāryate,* K. has *vikāryate,* the Beng. *vipralabhyate* and *vipratāryate.*

गौतमी ।

[a] किं माणसी सिद्धी[1] ।

द्वितीयः ।

न खलु । श्रूयताम् । तत्रभवता वयमाज्ञप्ताः । शकुन्तला-
हेतोर्वनस्पतिभ्यः कुसुमान्याहर्तेति[2] । तत इदानीं
क्षौमं केनचिदिन्दुपाण्डु तरुणा माङ्गल्यमाविष्कृतं
निष्यूतश्चरणोपभोगसुलभो लाक्षारसः केनचित् ।
अन्येभ्यो वनदेवताकरतलैरापर्वभागोत्थितै-
र्दत्तान्याभरणानि तत्किसलयोद्भेदप्रतिद्वन्द्विभिः[3] ॥ ८५ ॥

[a] किं मानसी सिद्धिः ।

---

[1] 'Was it a mental creation?' i. e. were these ornaments created by the power of his mind? K. has *sṛishṭiḥ* for *siddhiḥ*. Cf. p. 79, n. 1.

[2] 'Bring hither flowers for Śakuntalā from the trees of the forest.'

[3] 'By a certain tree a fine-linen-robe white-as-the-moon indicative-of-good-fortune was made to appear [produced]; by another, juice-of-lac, ready for the use of [the dyeing of] the feet was distilled [exuded]; from others, ornaments were presented by the hands [palms] of wood-nymphs stretched out (so as to be visible) as far as the wrist, emulating the first sprouting of the young-shoots of those (trees).' *Kshauma=vālkala-vastra-bheda*, Ć. *Kshaumam māṅgalyam=dukūlam maṅgalārham*, Ś. *Māṅgalya* may mean 'with words of good omen,' 'with blessings and prayers for good fortune (*kalyāṇa-vākyaiḥ*), such as, "May she be the beloved wife of her lord,"' &c., Ś. *Indu-pāṇḍu=ćandra-dhavala*. *Āvish-kṛitam=ud-bhāvitam*, K.; *=dānāya prakāśitam*, Ś. *Nishṭhyūtaḥ=udgīrṇaḥ*. *Ćaraṇopabhoga-sulabho*, some Beng. MSS. have *ćaraṇoparāga-subhago*; the oldest have *upabhoga*. Here *sulabha=kshama* or *yogya*, 'adapted' (cf. Kumāra-s. v. 69). *Lākshā=alakta* or *alaktaka*, 'lac,' 'a red dye,' prepared from an insect, analogous to the cochineal insect. This minute red insect is found in great numbers in the Palāśa, Indian fig tree, and some other trees. It punctures the bark, whence exudes a resinous

---

Verse 85. ŚĀRDŪLA-VIKRĪḌITA (a variety of ATIDHṚITI). See verses 14, 30, 36, 39, 40, 63, 79.

प्रियंवदा ॥ शकुन्तलां विलोक्य ॥

[a] हला । इमाए अब्भुवबत्तीए सूइदा दे भत्तुणो गेहे अणुहोदव्वा राअलच्छित्ति[1] ।

॥ शकुन्तला व्रीडां रूपयति ॥

प्रथमः ।

गौतम । एह्येहि । अभिषेकोत्तीर्णाय[2] काश्यपाय वनस्पतिसेवां निवेदयावः ।

द्वितीयः ।

तथा ।

॥ इति निष्क्रान्तौ ॥

सख्यौ ।

[b] अए । अणुवहुत्तभूसणो अअं जणो । चित्तकम्मपरिअएण अङ्गेसु दे आहरणविणिओअं करेम्ह[3] ।

[a] हला । अनयाभ्युपपत्त्या सूचिता ते भर्तुर्गृहेऽनुभवितव्या राजलक्ष्मीः । [b] अये । अनुपभुक्तभूषणोऽयं जनः । चित्रकर्मपरिचयेनाङ्गेषु ते आभरणविनियोगं कुर्वः ।

---

milky juice, with which it surrounds itself in a kind of nest, and which when dry may be broken off, and used for various purposes. This hardened and reddened substance is variously called gum-lac, shell-lac, stick-lac, &c. *Ā-parva*, &c.=*parva-bhāga-paryantam udgataiḥ*. *Parva-bhāga*=*maṇi-bandha*, 'the wrist,' K. *Ā*, 'as far as,' generally requires the abl. of a word not in composition; thus, *ā-maṇi-bandhāt pāṇiḥ*, 'the hand as far as [from] the wrist.' *Tat-kisalaya*, &c., the Beng. and S'. read *naḥ*, 'to us,' for *tat*, and *kiśalaya-ććhāya-parispardhibhiḥ*, 'rivalling the hue of young shoots.' According to Kavikaṇṭha-hāra, quoted by S'., ornaments are divided into four kinds: 1. *Āvedhya*, as ear-rings, &c.; 2. *Bandhanīya*, as flowers, &c.; 3. *Kshepya* or *prakshepya*, as anklets, foot-ornaments, &c.; 4. *Āropya*, as necklaces, garlands, &c.

[1] 'By this favour, royal fortune is indicated as (ever) to be enjoyed by thee in the house of thy husband.' *Abhyupapattyā*=*vṛikshānugraheṇa*, 'by the favour of the sylvan deities.'

[2] 'Returned [come up] from bathing.' *Ut-tṛī* is 'to come out of the water,' 'to come to land.' So *jalād uttīrya*, Mahā-bh. iii. 211.

[3] 'We [these persons] are unused to ornaments. By our acquaintance

शकुन्तला ।

[a] जाणे वो णेउणं । ॥ उभे नाट्येनालङ्कुरुतः ॥

॥ ततः प्रविशति स्नानोत्तीर्णः काश्यपः ॥

काश्यपः ।

यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया
कण्ठः स्तम्भितवाष्पवृत्तिकलुषश्चिन्ताजडं दर्शनम् ।
वैक्लव्यं मम तावदीदृशमपि स्नेहादरण्यौकसः
पीड्यन्ते गृहिणः कथं नु तनयाविश्लेषदुःखैर्नवैः[1] ॥८६॥

॥ इति परिक्रामति ॥

[a] जाने वां नैपुणम् ।

---

with the art of painting we will make the arrangement of the ornaments on thy limbs.' *Aṇubahutta* for *anupabhukta* is the reading of my own MS. and the Mackenzie, supported by K. *Ćitra-karma*, &c., 'by our knowledge of painting,' i. e. we will decorate thee in the manner we have seen in paintings (*ćitra-likhane yathābharaṇa-prayogo dṛishṭo 'sti tenaiva prakāreṇa*, S'.)

[1] '"This very day will S'akuntalā depart," at such (a thought), my heart is smitten with melancholy [grief for her loss]; my voice [throat] is agitated by suppressing the flow of tears; my sight is paralysed by anxious thought. So great indeed through affection (is) the mental-agitation even of me a hermit. How (much more) then, are householders afflicted by new pangs at separation from their daughters!' *Iti*, see p. 140, n. 2. *Saṃspṛishṭam*, &c., one MS. (India Office, 1060) reads *spṛishṭaṃ samutkaṇṭhayā*. *Kaṇṭhaḥ*, &c., the Beng. have *antar-vāshpa-bhāro-parodhi gaditam*, 'my voice is obstructed by the weight (*ādhikyena*, S'.) of suppressed tears.' *Vāshpa*, i. e. *aśruṇaḥ pūrvāvasthā*, 'the first stage or state of a tear,' 'the hot moisture that overspreads the eye, before the tear-drop is formed,' K. *Darśana=nayana*, 'eye-sight.' *Jaḍa=vishayā-grāhaka*, 'having no perception of external objects;' or=*kartavyāpari-ćchedaka*, but in this case *darśana=jñāna*, S'. The effect of deep thought

---

Verse 86. ŚĀRDŪLA-VIKRĪḌITA (a variety of ATIDHṚITI). See verses 14, 30, 36, 39, 40, 63, 79, 85.

सख्यौ ।

[a]हला सउन्दले । अवसिदमण्डणासि । परिधेहि सम्पदं खोमजुअलं[1] ।

॥ शकुन्तलोत्थाय परिधत्ते ॥

गौतमी ।

[b]जादे । एसो दे आणन्दपरिवाहिणा चक्खुणा परिस्सजन्तो विअ गुरू उवट्ठिदो । आआरं दाव पडिबज्जस्स[2] ।

शकुन्तला ॥ सव्रीडम् ॥

[c]ताद । वन्दामि ।

[a] हला शकुन्तले । अवसितमण्डनासि । परिधत्स्व साम्प्रतं क्षौमयुगलम् । [b] जाते । एष ते आनन्दपरिवाहिणा चक्षुषा परिष्वजमान इव गुरुरुपस्थितः । आचारं तावत्प्रतिपद्यस्व । [c] तात । वन्दे ।

---

and abstraction of mind might be to paralyse for the moment the organs of vision. S. quotes an aphorism of Bharata, *Nidrā-nāśaś ca cintā ca bhrāntiś cotsuka-cetasām.* *Nu* is used *praśne*, 'in asking a question,' S. *Araṇyaukas=vānaprastha* or *araṇya-vāsin*, 'one whose dwelling (*okas*) is in the woods,' 'a hermit,' see *vanaukas.* *Gṛihin=gṛihastha*, 'a householder,' 'the father of a family.' The Brāhman was required to divide his life into four orders (*āśrama*). In the first he was a *Brahmacārin*, or 'student of religion;' in the second, a *Gṛihastha*, or 'householder;' in the third, a *Vānaprastha* (*Vaikhānasa*), or 'anchorite;' in the fourth, a *Bhikshu*, or 'religious mendicant;' see Indian Wisdom, p. 245.

[1] 'Thy decoration [toilet] is completed. Now do thou put on the pair of linen vestments.' A Hindū woman's dress generally consisted of two pieces; one covered the breast and shoulders, the other was a long robe enveloping the person. *Avasita-maṇḍanā=nishpanna-prasādhanā.*

[2] 'Here close-at-hand-stands thy spiritual-father as if (already) embracing thee [about to embrace thee], with an eye overflowing with joy. Perform now the customary-salutation.' *Ānanda-parivāhiṇā*, the Beng. have *ānanda-vāshpa-parivāhiṇā*, cf. p. 89, l. 13. *Ācāra*, 'good manners,' 'the usual complimentary greeting.' *Paḍibajjassa* for *pratipadyasva* is the reading of my own MS. and the Mackenzie, cf. p. 135, l. 4. The same expression occurs in Vikram., Act II.

काश्यपः ।

वत्से ।

ययातेरिव शर्मिष्ठा भर्तुर्बहुमता भव ।
सुतं त्वमपि सम्राजं सेव पुरुमवाप्नुहि[1] ॥ ८७ ॥

गौतमी ।

[a]भअवं । वरोक्खु एसो । ण आसिसा[2] ।

काश्यपः ।

वत्से । इतः सद्यो हुताग्नीन्प्रदक्षिणीकुरुष्व[3] ।

॥ सर्वे परिक्रामन्ति ॥

[a] भगवन् । वरः खल्वेषः । नाशीः ।

---

[1] 'Daughter, be thou highly honoured of thy husband, as was Śarmishṭhā of Yayāti. Do thou also obtain a son, a sovereign monarch, as she (obtained) Puru.' Śarmishṭhā, according to K., was the daughter of Vṛisha-parvan, king of the Asuras or demons, and wife of Yayāti, son of Nahusha, one of the princes of the Lunar race, and ancestor of Dushyanta, see p. 15, n. 1. The Sāhitya-darpaṇa (p. 190) cites this verse as an example of *āśīr-vāda*, 'benediction,' but reads (as also do the Beng.) *patyur* for *bhartur*, and *putram* for *sutam*. *Samrāj* is a sovereign prince, who has performed a *Rājasūya* sacrifice, and exercises despotic sway over others.

[2] 'This is actually a boon (conferred), not a (mere) benediction.' *Santushṭa-devādīnām avaśyam-bhāvi vaćanaṃ varaḥ, āśīs tu kadāćit phala-dāyinī vāk*, 'a *vara* is the promise of a propitiated deity, &c., which must necessarily come to pass; an *āśis* is a benediction which occasionally bears fruit [comes true],' Ć. and Ś.

[3] 'My child, this way! do thou at once circumambulate the sacrificial fires,' see p. 148, n. 1. *Sadyo-hutāgnīm=tatkshaṇa-kṛita-homāgnīm*, Ś. The Taylor and my own MS. have *sadyohutān*. *Sadyo* may, however, be separated from the next word, and translated 'at once,' 'immediately.' The rite of circumambulation is performed by slowly walking round any object, keeping the right side towards it.

Verse 87. Śloka or Anushṭubh. See verses 5, 6, 11, 12, 26, 47, 50, 51, 53, 73, 76, 84.

काश्यपः ॥ ऋक्छन्दसाशास्ते ॥

अमी वेदिं परितः कॢप्तधिष्ण्याः
समिद्धन्तः प्रान्तसंस्तीर्णदर्भाः ।
अपघ्नन्तो दुरितं हव्यगन्धै-
र्वैतानास्त्वां वहयः[1] पावयन्तु ॥ ८८ ॥

प्रतिष्ठस्वेदानीम् । ॥ सदृष्टिक्षेपम् ॥ क्व ते शार्ङ्गरवमिश्राः ।

---

[1] '[*Pronounces a blessing in the metre of the Ṛić*, i. e. according to the usual metre of the Ṛig-veda.] Let these fires, taken-from-the-sacred-hearth [*vaitānās*] whose places are fixed round the altar, fed with (consecrated) wood, having Darbha [Kuśa] grass strewed around the margin, destroying sin by the perfume of the oblations, purify thee.' Each stanza of the Sūktas or hymns of the Ṛig-veda is called a *ṛić*. *Asya vṛittasya vedoktāśīrvāda-sadṛiśatvam agni-prayuktatvādi boddhavyam*, 'it is to be understood that there is a similarity between the metre of this verse and that of the benedictions uttered in the Vedas addressed to fire,' &c., K. The verse itself does not occur in the Ṛig-veda, but the metre is Vedic. Doubtless Kālidāsa intended it as an imitation of Vedic poetry. That it is addressed to Agni constitutes in itself a point of resemblance. *Vaitāna*, see Indian Wisdom, p. 197. *Klṛipta-dhishṇyāḥ = racitādhishṭhānāḥ. Prānta-saṃstīrṇa-darbhāḥ*, i. e. *pārśveshu ćatasṛishu dikshu saṅkīrṇā darbhā yeshām*. At a sacrifice, the fires, severally termed *Āhavanīya*, *Mārjālīya*, *Gārhapatya*, and *Āgnīdhrīya*, were lighted at the four cardinal points, east, west, north, and south, and Kuśa grass (see p. 19, n. 1) was scattered round each fire. See Indian Wisdom, p. 205; see also Sāyaṇa's commentary on Ṛig-v. i. 1, 4, and cf. Ṛig-v. i. 31, 13, 'thou, four-eyed

Verse 88. TRISHṬUP ĆATUSH-PADĀ, a form of Vedic metre, consisting of four times eleven syllables, the first and third Pādas resembling the VĀTORMĪ, and the second and fourth, the ŚĀLINĪ variety of TRISHṬUBH. In the second, however, the first syllable is short.

⏑ – – – ⏑ ⏑ – – ⏑ – – ‖ ⏑ – – – – ⏑ – – ⏑ – –
⏑ – – – ⏑ ⏑ – – ⏑ – – ‖ – – – – – ⏑ – – ⏑ – –

In Ṛig-veda i. 59, 5, the first Pāda is exactly like the first in the above scheme, but the other Pādas are arranged differently, as far at least as the seventh syllable. Kālidāsa, accustomed to the strictness of the later Sanskṛit metres, seems here to have endeavoured to imitate the Vedic rhythm, in which greater liberty was allowed. Thus he produced a verse too irregular to come under any of the later metres, but rather too regular for a Vedic hymn.

शिष्यः ॥ प्रविश्य ॥

भगवन्[1] । इमे स्मः ।

काश्यपः ।

भगिन्यास्ते मार्गमादेशय[2] ।

शार्ङ्गरवः ।

इत इतो भवती । ॥ सर्वे परिक्रामन्ति ॥

काश्यपः ।

भो भोः सन्निहितास्तपोवनतरवः ।
पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या
नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम् ।
आद्ये वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः
सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम्[3] ॥८९॥

Agni, blazest as the protector of the worshippers,' &c. *Pālayantu* (=*rakshantu*) is the reading of all the Beng. MSS., supported by K., S'., and Ć., but all the Deva-n. MSS. have *pāvayantu*.

[1] S'. quotes a verse of Bharata, *Devāś ća, munayaś ćaiva, linginaḥ, sādhanāś ća* [*sādhakāś ća*, Ć.] *ye, bhagavann iti te vāćyāḥ sarvaiḥ strī-pun-napuṃsakaiḥ*, 'both gods and also Munis, Lingins and Sādhanas (? *sādhavas*, "saints," see Vishṇu-p. p. 300) are to be addressed as "Bhagavan," by all women, men, and eunuchs.'

[2] Cf. Vikram., Act II, *bhavān pramada-vana-mārgam ādeśayatu*.

[3] 'Listen! listen! ye neighbouring trees of the penance-grove. She who never attempts to drink water first, when you have not drunk, and who, although fond of ornaments, never plucks a blossom, out of affection for you, whose greatest-holiday [highest-joy] is at the season of the first appearance of your bloom, even that same S'akuntalā now departs to the house of her husband. Let her be affectionately-dismissed by (you) all.' *Bhoḥ* is a vocative particle, often joined with *śrūyatām*, 'listen!' *Vyavasyati*, 'makes effort,' may also mean 'resolves upon,' 'makes up her mind;' (with *na*), 'it never enters into her head.' *A-pīteshu*, the Beng. have *a-sikteshu*, i. e. 'as long as you remain unwatered.' The Deva-n. reading is supported by K., who includes *pīta* among the passive participles, like

Verse 89. ŚĀRDŪLA-VIKRĪḌITA (a variety of ATIDHṚITI). See verses 14, 30, 36, 39, 50, 63, 79, 85, 86.

काश्यपः ॥ ऋक्छन्दःसाशास्ते ॥

अमी वेदिं परितः कॢप्तधिष्ण्याः
समिद्धन्तः प्रान्तसंस्तीर्णदर्भाः ।
अपघ्नन्तो दुरितं हव्यगन्धै-
र्वैतानास्त्वां वहयः पावयन्तु ॥ ८८ ॥

प्रतिष्ठस्वेदानीम् । ॥ सदृष्टिक्षेपम् ॥ क्व ते शार्ङ्गरवमिश्राः ।

---

[1] '[*Pronounces a blessing in the metre of the Ṛić*, i. e. according to the usual metre of the Ṛig-veda.] Let these fires, taken-from-the-sacred-hearth [*vaitānās*] whose places are fixed round the altar, fed with (consecrated) wood, having Darbha [Kuśa] grass strewed around the margin, destroying sin by the perfume of the oblations, purify thee.' Each stanza of the Sūktas or hymns of the Ṛig-veda is called a *ṛić*. *Asya vṛittasya vedoktāśīrvāda-sadṛiśatvam agni-prayuktatvādi boddhavyam*, 'it is to be understood that there is a similarity between the metre of this verse and that of the benedictions uttered in the Vedas addressed to fire,' &c., K. The verse itself does not occur in the Ṛig-veda, but the metre is Vedic. Doubtless Kālidāsa intended it as an imitation of Vedic poetry. That it is addressed to Agni constitutes in itself a point of resemblance. *Vaitāna*, see Indian Wisdom, p. 197. *Kḷipta-dhishṇyāḥ = racitādhishṭhānāḥ. Prānta-saṃstīrṇa-darbhāḥ*, i. e. *pārśveshu ćatasṛishu dikshu saṅkīrṇā darbhā yeshām*. At a sacrifice, the fires, severally termed *Āhavanīya, Mārjālīya, Gārhapatya*, and *Āgnīdhrīya*, were lighted at the four cardinal points, east, west, north, and south, and Kuśa grass (see p. 19, n. 1) was scattered round each fire. See Indian Wisdom, p. 205; see also Sāyaṇa's commentary on Ṛig-v. i. 1, 4, and cf. Ṛig-v. i. 31, 13, 'thou, four-eyed

---

Verse 88. TRISHṬUP ĆATUSH-PADĀ, a form of Vedic metre, consisting of four times eleven syllables, the first and third Pādas resembling the VĀTORMĪ, and the second and fourth, the ŚĀLINĪ variety of TRISHṬUBH. In the second, however, the first syllable is short.

⏑ – – – ⏑ ⏑ – – ⏑ – – ‖ ⏑ – – – – ⏑ – – ⏑ – –
⏑ – – – ⏑ ⏑ – – ⏑ – – ‖ – – – – – ⏑ – – ⏑ – –

In Ṛig-veda i. 59, 5, the first Pāda is exactly like the first in the above scheme, but the other Pādas are arranged differently, as far at least as the seventh syllable. Kālidāsa, accustomed to the strictness of the later Sanskṛit metres, seems here to have endeavoured to imitate the Vedic rhythm, in which greater liberty was allowed. Thus he produced a verse too irregular to come under any of the later metres, but rather too regular for a Vedic hymn.

शिष्यः ॥ प्रविश्य ॥

भगवन्[1]। इमे स्मः।

काश्यपः।

भगिन्यास्ते मार्गमादेशय[2]।

शार्ङ्गरवः।

इत इतो भवती। ॥ सर्वे परिक्रामन्ति ॥

काश्यपः।

भो भोः सन्निहितास्तपोवनतरवः।
पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या
नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम्।
आद्ये वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः
सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम्[3]॥८९॥

Agni, blazest as the protector of the worshippers,' &c. *Pālayantu* (=*rakshantu*) is the reading of all the Beng. MSS., supported by K., S'., and Ć., but all the Deva-n. MSS. have *pāvayantu*.

[1] S'. quotes a verse of Bharata, *Devāś ća, munayaś ćaiva, linginaḥ, sādhanāś ća* [*sādhakāś ća*, Ć.] *ye, bhagavann iti te vāćyāḥ sarvaiḥ strī-pun-napuṇsakaiḥ*, 'both gods and also Munis, Lin-gins and Sādhanas (? *sādhavas*, "saints," see Vishṇu-p. p. 300) are to be addressed as "Bhagavan," by all women, men, and eunuchs.'

[2] Cf. Vikram., Act II, *bhavān pramada-vana-mārgam ādeśayatu*.

[3] 'Listen! listen! ye neighbouring trees of the penance-grove. She who never attempts to drink water first, when you have not drunk, and who, although fond of ornaments, never plucks a blossom, out of affection for you, whose greatest-holiday [highest-joy] is at the season of the first appearance of your bloom, even that same S'akuntalā now departs to the house of her husband. Let her be affectionately-dismissed by (you) all.' *Bhoḥ* is a vocative particle, often joined with *śrūyatām*, 'listen!' *Vyavasyati*, 'makes effort,' may also mean 'resolves upon,' 'makes up her mind;' (with *na*), 'it never enters into her head.' *A-pīteshu*, the Beng. have *a-sikteshu*, i. e. 'as long as you remain unwatered.' The Deva-n. reading is supported by K., who includes *pīta* among the passive participles, like

Verse 89. ŚĀRDŪLA-VIKRĪḌITA (a variety of ATIDHṚITI). See verses 14, 30, 36, 39, 50, 63, 79, 85, 86.

॥ कोकिलरवं सूचयित्वा[1] ॥

अनुमतगमना शकुन्तला
तरुभिरियं वनवासबन्धुभिः ।
परभृतविरुतं कलं यथा
प्रतिवचनीकृतमेभिरीदृशम्[2] ॥ ९० ॥

आकाशे ।

रम्यान्तरः कमलिनीहरितैः सरोभि-
श्छायाद्रुमैर्नियमितार्कमयूखतापः ।

---

gata, *sthita*, *ārūḍha*, &c. (Pāṇ. iii. 4, 72), which may have an active signification. *Vismṛita* may be included in the same list, see p. 28, l. 3. *Priya*, in the sense 'fond of,' may stand at the beginning of a compound, cf. *φιλοσοφία*, *φιλόξενος* (*priyātithi*), &c.; sometimes at the end, e. g. *jala-priya*, 'fond of water.'

[1] 'Acting as if he heard the note of a cuckoo,' lit. 'shewing the note of a cuckoo.' Compare *nimittaṃ sūćayitvā*, Vikram., Act II.

[2] 'This Śakuntalā is permitted to depart by the trees, the foresters'-kinsfolk; since a song to this effect, warbled by the cuckoo, was employed as an answer by them.' *Vana-vāsa-bandhubhiḥ*=*araṇya-vāsa-snigdhaiḥ*, 'beloved by foresters.' It may be translated 'her sylvan relatives.' *Para-bhṛita* (=*pika*), lit. 'nourished by a stranger.' The Indian Koïl or cuckoo is supposed to leave her eggs in the nest of the crow to be hatched, but has little resemblance to the bird known as the cuckoo in Europe. One of its names is *vasanta-dūta*, 'messenger of spring.' Its song is said to be sweet (*madhura*, Ṛitu-s.), but cannot be compared to that of the nightingale. 'The beauty of cuckoos is their song,' Hitop. l. 839. 'On a journey (*yātrāyām*) the note of a cuckoo is indicative of good-fortune (*śubha-sūćakaḥ*). The answer of the trees was effected by the song of the cuckoo (*pika-raveṇaiva sampannam*). Next the answer of the sylvan deities is given (by a voice in the air),' S. *Kala* as an adj. means 'soft,' 'sweet,' and *parabhṛita-virutaṃ kalam* may be 'the sweet notes of the cuckoo' (cf. Raghu-v. viii. 58).

Verse 90. APARA-VAKTRĀ, containing eleven syllables to the first Pāda or quarter-verse, and twelve to the second, each half-verse being alike.

⏑ ⏑ ⏑ ⏑ ⏑ ⏑ – ⏑ – ⏑ – ‖ ⏑ ⏑ ⏑ ⏑ – ⏑ ⏑ – ⏑ – ⏑ –

भूयात्कुशेशयरजोमृदुरेणुरस्याः
शान्तानुकूलपवनश्च शिवश्च पन्थाः ॥ ९१ ॥

॥ सर्वे सविस्मयमाकर्णयन्ति ॥

गौतमी ।

[a] जादे । णादिजणसिणिद्धाहिं [2] अणुण्णादगमणासि तवोवणदेवदाहिं । पणम भअवदीणं [3] ।

[a] जाते । ज्ञातिजनस्निग्धाभिरनुज्ञातगमनासि तपोवनदेवताभिः । प्रणम भगवतीभ्यः ।

---

[1] 'May her path be pleasantly-diversified [pleasant at intervals] by lakes (that are) verdant with-lotus-beds, (may it have) the heat of the sun's rays moderated by shady trees, (may) its dust be soft with the [as the] pollen from the lotuses, and (may it be cheered by) gentle favourable breezes and (be altogether) prosperous.' *Ramyāntaraḥ*=*manohara-madhyaḥ*, S.; = *manojña-madhyaḥ*, C., 'having its middle space delightful,' 'pleasant throughout the intervening distance,' an epithet of *panthāḥ*. *Ćhāyā-drumaiḥ* = *ćhāyā-pradhānair-vṛikshaiḥ*, 'trees chiefly abounding in shade,' K.; = *ćhāyā-lakshita-drumaiḥ*, 'trees characterized by shade,' C. It is a compound similar to *śāka-pārthiva* and *abhijñāna-śakuntalā*, see p. 4, n. 2. 'That is called a *ćhāyā-taru*, 'shade-tree,' whose under-part (*talam*) excessively cool shade (*atyanta-śītala-ććhāyā*) does not quit either in the forenoon or afternoon,' S. and C. *Niyamita*= *apanīta*. *Kuśe-śaya*, lit. 'lying in water;'=*śata-pattra*, 'a lotus.' *Śānta* =*śānta-vega*, *manda*, K.; =*pāṭaććarādi-śunya*, 'free from robbers,' &c., S. and C. The compound may therefore be translated 'free from molestation and having favourable breezes.' *Śivaś ća bhūyāt panthāḥ*, this seems to have been a phrase commonly used as a parting benediction, like 'A pleasant journey to you!' Cf. *panthānas te santu śivāḥ*, Hitop. l. 1442, Sāhit.-d. p. 344, Mudrā-r. p. 30, l. 17, and p. 179, l. 4 of this play.

[2] 'Dear to thee as (thy own) kinsfolk.' Cf. *vana-vāsa-bandhubhiḥ* in verse 90. My own Bombay MS. has *ṇṇādi* (supported by the Calcutta edition), the others all *ṇādi* for *jñāti*. There is no doubt about the doubling of the *ṇ* when not initial, as Vararući, iii. 44, gives *viṇṇāṇa* for *viññāna*.

[3] *Bhaavadīṇam*, a Prākṛit gen. for Sanskṛit dat., see p. 129, n. 1.

Verse 91. VASANTA-TILAKĀ (a variety of ŚAKVARĪ). See verses 8, 27, 31, 43, 46, 64, 74, 80, 82, 83.

शकुन्तला ॥ सप्रणामं परिक्रम्य । जनान्तिकम् ॥

[a] हला पिअंवदे । णं अज्जउत्तदंसणुस्सुआएवि अस्समं परिच्चअन्तीए दुक्खेण[1] मे चलणा पुरदो पवट्टन्ति ।

प्रियंवदा ।

[b] ण केवलं तवोवणविरहकादरा सही एव्व । तुए उवट्ठिदविओअस्स तवोवणस्सवि दाव समवत्था[2] दीसइ ।

उग्गलिअदब्भकवला मिआ परिच्चत्तणच्चणा मोरा ।
ओसरिअपण्डुपत्ता मुअन्ति अंसू विअ लदाओ[3] ॥ ९२ ॥

[a] हला प्रियंवदे । नन्वार्यपुत्रदर्शनोत्सुकाया ऋष्याश्रमं परित्यजन्त्या दुःखेन मे चरणौ पुरतः प्रवर्तेते । [b] न केवलं तपोवनविरहकातरा सख्येव । त्वयोपस्थितवियोगस्य तपोवनस्यापि तावत्समवस्था दृश्यते ।

उद्गलितदर्भकवला मृगाः परित्यक्तनर्तना मयूराः ।
अपसृतपाण्डुपत्रा मुञ्चन्त्यश्रूणीव लताः ॥ ९२ ॥

---

[1] My own MS., supported by K., has *duḥkhena*, the others *duḥkha-duḥkhena*.

[2] 'One may observe the same (troubled) condition [the same condition is observed] of the penance-grove, as the (time of) separation from thee approaches.' *Samavasthā=samāvasthā*, as in Raghu-v. viii. 41. The Taylor MS. reads *samāvatthā*.

[3] 'The deer let fall the mouthfuls of Darbha-grass, the peacocks cease (their) dancing, the creepers, as they cast [in casting] their pale leaves, appear to shed tears [as it were shed tears].' *Udgalita*, from *ud-gal*, lit. 'to trickle out,' 'drop from.' The Beng. MSS. read *ugginṇa* (=*udgīrṇa*), 'ejected from the throat or mouth.' *Mṛigāḥ*, all the Deva-n. read *mīo* for *mṛigyaḥ*, and in the next line *assūṇi* for *aśrūṇi*, apparently in violation of the metre. Dr. Boehtlingk has suggested *miā* and *aṇsū*, the latter is a legitimate acc. pl. from *aṇsu*, the masc. Prākṛit equivalent of the neuter *aśru*; see Vararuċi iv. 15. *Parityakta-nartanā*, the dancing of

---

Verse 92. Āryā or Gāthā. See verse 2.

— ∪ ∪ | ∪ — ∪ | ∪ ∪ — ‖ ∪ — ∪ | — — | ∪ — ∪ | — — | —
— ∪ ∪ | ∪ — ∪ | — — ‖ ∪ — ∪ | — — | ∪ | ∪ ∪ — | —

शकुन्तला ॥ स्मृत्वा ॥

[a] ताद। लदावहिणिअं वणजोसिणिं दाव आमन्तइस्सं[1]।

काश्यपः।

अवैमि ते तस्यां सोदर्यस्नेहम्। इयं तावद्दक्षिणेन[2]।

शकुन्तला ॥ लतामुपेत्य ॥

[b] वणजोसिणि। चूदसङ्गदाबि मं पच्चालिङ्ग इदोगदाहिं साहाबाहाहिं[3]। अज्जप्पहुदि दूरपरिवत्तिणी दे खु भविस्सं।

काश्यपः।

सङ्कल्पितं प्रथममेव मया तवार्थे
भर्तारमात्मसदृशं सुकृतैर्गता त्वम्।

[a] तात। लताभगिनीं वनज्योत्स्नां तावदामन्त्रयिष्ये। [b] वनज्योत्स्ने। चूतसङ्गतापि मां प्रत्यालिङ्गतोगताभिः शाखाबाहाभिः। अद्यप्रभृति दूरपरिवर्तिनी ते खलु भविष्यामि।

---

the Indian peacock, especially at the approach of rain, in which it is said to take especial delight, is frequently alluded to in Hindū poetry. Cf. Megha-d. 46, 78; Ṛitu-s. ii. 6; Bhartṛi-h. i. 43. *Osaria* for *apasṛita*, see Lassen's Instit. Prāk. p. 363. Raghu-v. xiv. 69 contains a sentiment precisely parallel to the above, *Nṛityam mayūrāḥ, kusumāni vṛikshā, darbhān upāttān vijahur hariṇyaḥ*, &c.

[1] 'Father, I will just bid farewell to (my) tendril-sister, the Light of the Grove,' i. e. the Nava-mālikā, or young jasmine-creeper, mentioned at p. 28, l. 3.

[2] 'I know thy sisterly affection for it. Here it is now to the right.' *Sodarya*, 'of whole blood,' 'born from the same womb' (*udara*); compare p. 22, l. 9.

[3] 'O Light of the Grove, though united with the mango-tree, embrace me with (thy) arms-of-branches turned in this direction.' *Cūta-saṅgatā*, see p. 28, n. 1. *Ito-gatābhiḥ*, &c., is the reading of all the Deva-n. MSS. (supported by K.) excepting one, which has *idogadehiṃ sāhā-bāhūhim* for *ito-gataiḥ śākhā-bāhubhiḥ*. The feminine noun *bāhā* is more appropriately joined with *śākhā*, but *bāhu* is admissible, compare p. 26, l. 2. The Beng. have *śākhāmayair bāhubhiḥ*, 'with arms consisting of branches.'

चूतेन संश्रितवती नवमालिकेय-
मस्यामहं त्वयि च सम्प्रति वीतचिन्तः[1] ॥ ९३ ॥

इतः पन्थानं प्रतिपद्यस्व[2] ।

शकुन्तला ॥ सख्यौ प्रति ॥

[a] हला । एसा दुवेणं वो हत्थे णिक्खेवो[3] ।

सख्यौ ।

[b] अअं जणो कस्स[4] हत्थे समप्पिदो । ॥ इति वाष्पं विहरतः[5] ॥

काश्यपः ।

अनसूये । अलं रुदित्वा । ननु भवतीभ्यामेव स्थिरीकर्तव्या शकुन्तला[6] ।

॥ सर्वे परिक्रामन्ति ॥

[a] हला । एषा द्वयोर्वां हस्ते निक्षेपः । [b] अयं जनः कस्य हस्ते समर्पितः ।

---

[1] 'Thou by (thy) merits hast obtained [hast gone to] a husband suited-to-thyself, just as originally determined upon by me on thy account: this young Mālikā (creeper) has united itself with the mango-tree; now (therefore) I am free from solicitude about it and about thee.' *Sankalpitam*, &c., see p. 49, l. 5; and p. 135, l. 10 with note 2. *Tavārthe=tava kṛite*, K. *Ātma-sadṛiśam = tvat-samam*, K.; *rūpa-kulādinā sva-sadṛiśam*, 'resembling thyself in beauty, family,' &c., S.; see p. 31, n. 1. *Gatā=prāptā*, K.; see p. 161, n. 3 at the end. *Saṃśritavatī=sangatavatī*, K. My own MS. has *saṃskṛitavatī*, and the Colebrooke *sammitavatī*. *Vīta-ćinta = tyakta-varānusandhāna*, 'ceased from searching after a husband,' S.

[2] 'Set out on thy journey hence.' *Pratipadyasva*, see p. 135, n. 1.

[3] 'This (creeper) is (entrusted) as a pledge into the hand of you two.' *Nikshepa=sthāpya*, S. *Yathā sthāpyo rakshyate tatheyam.*

[4] 'Into whose hands are we committed (by thee)?' *Ayaṃ janaḥ*, i. e. *asmad-rūpaḥ*, S. and C.

[5] *Vi-hṛi* seems here used in the sense of 'to wipe away.'

[6] 'Enough of weeping! Surely Śakuntalā should be cheered [rendered

---

Verse 93. VASANTA-TILAKĀ (a variety of ŚAKVARĪ). See verses 8, 27, 31, 43, 46, 64, 74, 80, 82, 83, 91.

शकुन्तला ।

[a] ताद । एसा उडजपज्जन्तचारिणी गब्भमन्थरा मिअबहू जदा अणघप्पसवा होइ । तदा मे कम्पि पिअणिवेदइत्तअं विसज्जइस्सह[1] ।

काश्यपः ।

नेदं विस्मरिष्यामः ।

शकुन्तला ॥ गतिभङ्गं रूपयित्वा ॥

[b] को णुक्खु एसो णिवसणे मे सज्जइ । ॥ इति परावर्तते ॥

काश्यपः ।

वत्से ।

यस्य त्वया व्रणविरोपणमिङ्गुदीनां
तैलं न्यषिच्यत मुखे कुशसूचिविद्धे ।
श्यामाकमुष्टिपरिवर्धितको जहाति
सोऽयं न पुत्रकृतकः पदवीं मृगस्ते[2] ॥ ९४ ॥

[a] तात । एषोटजपर्यन्तचारिणी गर्भमन्थरा मृगवधूर्यदानघप्रसवा भवति । तदा मे कमपि प्रियनिवेदयितारं विसर्जयिष्यथ । [b] को नु खल्वेष निवसने मे सज्जति ।

---

firm, supported] by you indeed?' i. e. you are the very persons who should rather support and comfort your friend. *Alaṃ ruditvā*, see p. 48, n. 3. *Sthirī-kartavyā=tapovana-viraha-kheda-rahitā vidheyā*, S'.

[1] 'When this doe [female deer] grazing in the neighbourhood of the hut, slow by (the weight of) her young, has happily brought forth; then you will send some one to announce [as an announcer of] the agreeable news to me.' *Anagha-prasavā=vyasana-rahita-prasūtiḥ*, 'bringing forth without any mishap,' K. *Priya*, i. e. *priya-vārtā*, S'.

[2] 'That same fawn, thy adopted child, tenderly reared with handfuls of S'yāmāka-grains, on whose mouth, when pricked by the sharp-points of the Kuśa-grass, sore-healing oil of In-gudī-plants was sprinkled by thee,

---

Verse 94. VASANTA-TILAKĀ (a variety of ŚAKVARĪ). See verses 8, 27, 31, 43, 46, 64, 74, 80, 82, 83, 91, 93.

शकुन्तला ।

[a] वच्छ । किं सहवासपरिच्चाइणिं मं अणुसरसि । अचिरप्पसूदाए जणणीए विणा विवड्ढिदो एव्व[1] । दाणिम्पि मए विरहिदं तुमं तादो चिन्तइस्सदि । णिवत्तेहि दाव । ॥ इति रुदन्ती प्रस्थिता ॥

काश्यपः ।

उत्पक्ष्मणोर्नयनयोरुपरुद्धवृत्तिं
वाष्पं कुरु स्थिरतया विरतानुबन्धम् ।

[a] वत्स । किं सहवासपरित्यागिनीं मामनुसरसि । अचिरप्रसूतया जनन्या विना विवर्धित एव । इदानीमपि मया विरहितं त्वां तातश्चिन्तयिष्यति । निवर्तस्व तावत् ।

---

will not forsake thy footsteps [path].' *Vraṇa-viropaṇa=kshata-prarohaka*, S., lit. 'that which causes a scar to cicatrize.' See *ropaṇa* in Dict. *Ingudīnām*, see p. 18, n. 1. *Kuśa-sūći*, see p. 57, n. 5. *Parivardhitaka=anukampayā vardhitaḥ*, 'compassionately reared,' K.; *=atiśayena poshitaḥ*, 'excessively nourished,' S. and Ć. The suffix *ka* sometimes gives the sense of compassionating (*anukampāyām*). So *putrakaḥ=anukampitaḥ putraḥ* according to Pāṇ. v. 3, 76. The preposition *pari* may give the sense of *atiśayena* noticed by the other commentators. *Śyāmāka=vrīhi-viśesha*, 'a kind of rice,' S. It is rather the grain of a kind of Panic grass, eaten by the Hindūs. *Mushṭi*, 'a handful,' is the first measure of capacity, equivalent to $\frac{1}{8}$th of a *kuñji*, $\frac{1}{12}$th of a *kuḍava*, $\frac{1}{48}$th of a *prastha*. *Putra-kṛitaka=kṛitrima-putra*, 'a factitious or adopted son,' S. and C. K. explains this compound by referring to Pāṇ. ii. 1, 59, so that *putra-kṛita*, 'made into a son' (i. e. *a-putra*, 'not really a son'), is like *śreṇi-kṛita*, 'made into a line,' and *pūga-kṛita*, 'made into a heap.'

[1] 'Why dost thou follow me, an abandoner of (my) companions? Thou indeed wast reared (by me) without (thy) mother [when deprived of thy mother] shortly after she had brought thee forth.' *Saha-vāsa*, lit. 'one who lives with another.' The Beng. have *aćira-prasūtoparatayā = pra-saṁāryasaṁhita-kāla-mṛitayā*, 'that died directly after bringing thee forth.'

अस्मिन्नचलक्षितननतोन्नतभूमिभागे
मार्गे पदानि खलु ते विषमीभवन्ति[1] ॥ ९५ ॥

शार्ङ्गरवः ।

भगवन्। ओदकान्तात्स्निग्धो जनोऽनुगन्तव्य इति श्रूयते। तदिदं सरस्तीरम्। अत्र सन्दिश्य प्रतिगन्तुमर्हसि[2]।

---

[1] 'By-a-vigorous-effort [by firmness] make the tears cease to hang [cling] in (thy) upturned-eyelashed eyes, obstructing (their) free-action [impeding our business]. In this path in which the undulations of ground [the depressed and elevated portions of ground] are not discernible, thy footsteps must certainly be uneven.' *Utpakshmaṇoḥ*, see p. 131, n. 1 in the middle. *Uparuddha-vṛittim = pratiruddha-vyāpāram*, 'impeding the functions or proper action of the organs of vision,' Ć. *Uparuddhā antaritā vṛittir vyāpāro yena*, K. In p. 157, l. 6, *vṛitti* is applied to the course of a tear; but if so translated here, the other epithet, *viratānubandham*, would be superfluous. It is not necessary, however, to connect it with *nayanayoḥ*, as the passage might be rendered 'make the tears that impede our business cease to cling in (thy) upturned-eyelashed-eyes.' *Vāshpa* is 'the hot moisture that precedes the formation of tears,' see p. 157, n. 1. It is used in the singular. Cf. *muñćato vāshpam ushṇam*, Megha-d. 12. *Viratānubandha*, my own MS. has *vihatānubandha; anubandha*, lit. 'binding after,' 'following after;' hence 'cleaving,' 'adhering.' The Beng. MSS. have *śithilānubandham = sāntārambham* (sic?), S'. *Visha-mī-bhavanti = skhalitāni syuḥ*, 'are liable to trip or stumble,' S'. and C'. Cf. p. 139, l. 3.

[2] '"A friend is [or friends are] to be escorted as far as the water's brink"—such is the sacred precept. This, then, is the margin of a lake. Here having given (us) directions, be pleased to return.' *Odakāntāt*, i. e. *ā + udakāntāt = ā jalāntāt* (see p. 155, n. 3 near the end). *Odakāntād* is found in all the Deva-n. MSS.; my own has *odakāntam*. *Snigdho janaḥ* may be either 'a friend' or 'friends,' cf. *sakhī-jana*, p. 128, l. 2, with note 1. *Śrūyate*, lit. 'it is heard,' i. e. it is enjoined in *śruti*, 'scripture,' 'holy writ.'

Verse 95. VASANTA-TILAKĀ (a variety of ŚAKVARĪ). See verses 8, 27, 31, 43, 46, 64, 74, 80, 82, 83, 91, 93, 94.

काश्यपः ।

तेन हीमां क्षीरवृक्षच्छायामाश्रयामः[1] ।

॥ सर्वे परिक्रम्य स्थिताः ॥

काश्यपः ॥ आत्मगतम् ॥

किं नु खलु तत्रभवतो दुष्यन्तस्य युक्तरूपमस्माभिः सन्देष्टव्यम्[2] । ॥ इति चिन्तयति ॥

शकुन्तला ॥ जनान्तिकम् ॥

[a] हला । पेक्ख । णलिणीपत्तन्तरिदं पिअसहअरं अदेक्खन्ती आदुरा चक्कवाई आरडदि । दुक्करं अहं करेमित्ति[3] ।

[a] हला । प्रेक्षस्व । नलिनीपत्रान्तरितं प्रियसहचरमपश्यन्त्यातुरा चक्रवाक्यारटति । दुष्करमहं करोमीति ।

---

[1] *Kshīra-vṛiksha*, lit. 'milk-tree,' a kind of fig tree, not the Vaṭa or Banyan tree (Ficus Indica), nor the Pippala (Ficus Religiosa), but the glomerous fig tree (Ficus Glomerata), which yields a resinous milky juice from its bark (see p. 155, n. 3 in the middle) and is large enough to afford abundant shade.

[2] 'What message is to be sent by us (that will be) most appropriate for his majesty Dushyanta?' *Yukta-rūpa*, cf. p. 89, n. 1; and p. 15, l. 3.

[3] 'Friend, see! the poor female-Cakravāka, not perceiving her dear mate hidden by the lotus-leaves, calls to (him) thus, "Hard (is the lot) I suffer;"' see p. 128, n. 3, and cf. in Vikram., Act IV, *Sarasi nalinī-pattreṇāpi tvam āvṛita-vigrahāṃ nanu sahaćarīṃ dūre matvā viraushi samutsukaḥ*, 'thou indeed (i.e. the male Cakravāka) art sorrowfully crying to thy mate thinking her to be far away, although her body is only concealed from thee by a lotus-leaf in the lake.' A few lines before this passage, the cry is compared to the sound *ka ka*. Possibly this may account for the somewhat peculiar phrase *dukkaraṃ karemi*, here employed as the cry of the bird. K. has *dushkaraṃ khalu ahaṃ tarkayāmi*. It is true that *kṛi* sometimes has the sense of *tark*, 'think,' 'imagine' (cf. p. 42, n. 1), but *dushkaraṃ kṛi* is not more harsh than *śokaṃ kṛi*, 'to make or suffer sorrow.' S. has *dushkaram ayaṃ ćakravākaḥ karoti*. Instead of *pia*

अनसूया ।

[a]सहि । मा एवं मन्तेहि ।

एसाबि पिएण विणा गमेइ रअणिं विसाअदीहअरं ।
गरुअम्मि विरहदुक्खं आसाबन्धो सहावेदि ॥९६॥

काश्यपः ।

शार्ङ्गरव । त्वया मद्वचनात्स राजा शकुन्तलां पुरस्कृत्य[2] वक्तव्यः ।

शार्ङ्गरवः ।

आज्ञापयतु भवान् ।

[a] सखि । मैवं मन्त्वयस्व ।

एषापि प्रियेण विना गमयति रजनीं विषाददीर्घतराम् ।
गुर्वीपि विरहदुःखमाशाबन्धः साहयति ॥९६॥

---

three of the MSS. have *bi* for *api*. 'This verse indicates that Śakuntalā foresees she is about to experience similar sorrow, in having to endure separation from Dushyanta in consequence of the curse' (*śāpa-tirohita-Dushyantam a-lapsyamānā*), K.

[1] 'Speak not so. Even she [the female Cakravāka], without her beloved, passes away the night made too long by sorrow. Expectation (of meeting again) makes the pain of separation, however severe, supportable.' *Gamayati*, lit. 'causes to go,' i. e. brings to an end. The Prākṛit *visāa* =*vishāda*, 'melancholy.' Ś. explains the phrase by *visūraṇā-dīrghām, kheda-dīrghām, duḥkha-dustarām. Āśā-bandha*, 'hope,' i. e. *prātar mām saṅgamayishyati*, 'in the morning he will be united to me.' Ś. makes this verse an example of the Āśvāsa Alaṅkāra. K. refers to a parallel passage in the Megha-d. 10, *Āśā-bandhaḥ kusuma-sadṛiśaḥ* [sic] *prāyaśo hy aṅganānāṃ sadyaḥ-pāti praṇayi hṛidayaṃ viprayoge ruṇaddhi.*

[2] 'Having placed in front,' i. e. 'having introduced,' 'having presented.'

Verse 96. Āryā or Gāthā. See verse 2.

– – | ∪ ∪ – | ∪ ∪ – ‖ ∪ – ∪ | ∪ ∪ – | ∪ – ∪ | – ∪ ∪ | –
∪ ∪ – | ∪ ∪ ∪ ∪ | – – ‖ – – | – – | ∪ | – – | ∪ .

काश्यपः ।

अस्मान्साधु विचिन्त्य संयमधनानुच्चैःकुलं चात्मन-
स्त्वय्यस्याः कथमप्यबान्धवकृतां स्नेहप्रवृत्तिं च ताम् ।
सामान्यप्रतिपत्तिपूर्वकमियं दारेषु दृश्या त्वया
भाग्यायत्तमतःपरं न खलु तद्वाच्यं वधूबन्धुभिः ॥९७॥[1]

शार्ङ्गरवः ।

गृहीतः सन्देशः ।

---

[1] 'Having well considered us as rich in devotion, and the exalted family of thyself, and that (free) flow of affection of this (maiden) towards thee [or the spontaneous flow of affection springing up in you for her] not in any manner brought about by relatives; she is to be regarded by thee, as (one) amongst (thy) wives, after raising her to an equality of rank [or with equal respect]. Beyond this is dependent on destiny, nor indeed ought that to be called in question by a wife's relations.' *Saṃyama-dhanān*, 'this implies that they were worthy of respect,' K. *Uccaiḥ-kulam*, &c., 'this implies that he would act with justice,' K.; see p. 15, n. 1. *Kathamapi=dur-graheṇa*, S. and C. Cf. p. 131, l. 6. *A-bāndhava-kṛitām*, see p. 127, n. 3. *Sneha-pravṛittim=prema-ceshṭām*, C. *Sāmānya-pratipatti-pūrvakam=sādhāraṇa-gaurava-puraḥsaram*, 'preceded by equal respect;' *yādṛiśena gauraveṇa aparā vadhūr ālokyate tādṛiśeṇa iyam*, &c., S. *Pratipatti* is either 'the act of preferring to rank,' or 'the respect paid to rank.' *Pūrva* or *pūrvaka* at the end of a compound often simply denotes the manner in which anything is done, translateable by 'with' or 'after' (cf. *sa bhavantam anāmaya-praśna-pūrvakam idam āha*, p. 198, l. 2; also p. 116, n. 2). *Dāreshu*, S. explains thus, *dāra-śabdaḥ puṃ-lingaḥ kalatra-vāćako nitya-bahuvaćanāntaḥ*, 'the word *dāra*, meaning a wife, is of the masculine gender, and always has a plural termination.' *Dārāḥ* therefore may be either wives or wife. *Ataḥ-param*, &c., 'here he tells the reason why he does not demand higher rank or greater honour for Śakuntalā,' S. In the first line, my own MS. reads *asmān sādhu samīkshya saṃyama-parān*. All marriages in the East are arranged by the relatives of the parties.

Verse 97. ŚĀRDŪLA-VIKRĪDITA (a variety of ATIDHṚITI). See verses 14, 30, 36, 39, 40, 63, 79, 85, 86, 89.

काश्यपः ।

वत्से । त्वमिदानीमनुशासनीयासि । वनौकसोऽपि सन्तो लौकिकज्ञा[1] वयम् ।

शार्ङ्गरवः ।

न खलु धीमतां कश्चिद्विषयो नाम[2] ।

काश्यपः ।

सा त्वमितः पतिकुलं प्राप्य

शुश्रूषस्व गुरून्कुरु प्रियसखीवृत्तिं सपत्नीजने
भर्तुर्विप्रकृतापि रोषणतया मा स्म प्रतीपं गमः ।
भूयिष्ठं भव दक्षिणा परिजने भाग्येष्वनुत्सेकिनी
यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः[3] ॥९८॥

कथं वा गौतमी मन्यते ।

---

[1] 'We (are) acquainted with worldly affairs,' 'we know the ways of the world' (=*loka-vyavahāra-jñāḥ*, S.)

[2] 'There is no subject out of the reach [*agoćaraḥ*, S.] of the intelligent,' i. e. wise men are conversant with all subjects.

[3] 'Pay respectful attention to (thy) superiors. Act the part of a dear friend towards (thy) fellow-wives [rival wives]. Even though wronged [treated harshly] by thy husband, do not out of anger shew [go to] a refractory-spirit. Be ever courteous towards (thy) attendants; not puffed up [arrogant] in prosperity—in this manner young-women attain the station [title] of housewife [matron]. Those of an opposite character are house-banes [banes of the family].' The Sāhit.-d. p. 185 adduces this as an example of the figure Upadishṭa, which is defined as *manohāri vākyaṃ śāstrānusārataḥ*. S. quotes the following aphorism, *Parisaṅgṛihya śāstrārthaṃ yad vākyam abhidhīyate vidvan manoharaṃ jñeyam upadishṭaṃ tad eva tu*. *Gurūn*=*svaśurādīn*, 'father-in-law,' &c., C. A Guru is not only a father or a father-in-law, but also a preceptor, and in fact any male relation entitled to *gaurava*, 'respect.' *Śuśrūshasva*=*ārādhaya*. *Vṛittim*, some of the Beng. and the Sāhit.-d., supported by S., read *vṛittam*

Verse 98. ŚĀRDŪLA-VIKRĪḌITA (a variety of ATIDHṚITI). See verses 14, 30, 36, 39, 40, 63, 79, 85, 86, 89, 97.

गौतमी ।

[a] एत्तिओ वहूजणस्स उवदेसो । जादे । एदंक्खु सव्वं ओधारेहि ।

काश्यपः ।

वत्से । परिष्वजस्व मां सखीजनं च ।

शकुन्तला ।

[b] ताद । इदो एव्व किं पिअंवदामिस्सा[2]ओ सहीओ णिवत्तिस्सन्ति ।

काश्यपः ।

वत्से । इमे अपि [3]प्रदेये । न युक्तमनयोस्तच गन्तुम् । त्वया सह गौतमी यास्यति ।

शकुन्तला ॥ पितरमाश्लिष्य ॥

[c] कहं दाणिं तादस्स अङ्कादो परिब्भट्ठा मलअतरुम्मूलिआ

[a] एतावान्वधूजनस्योपदेशः । जाते । एतत्खलु सर्वमवधार्य । [b] तात । इत एव किं प्रियंवदामिश्राः सख्यो निवर्तिष्यन्ते । [c] कथमिदानीं तातस्याङ्कात्परिभ्रष्टा मलयतरोन्मूलिता

=*caritram*, 'action,' 'deed,' 'behaviour,' 'demeanour.' *Viprakṛitā*=*pīḍitā*, C.;=*kṛita-vipriyā*, 'offended,' S. *Pratīpam*=*prātikūlyam*. *Bhūyishṭham*=*atiśayena*. *Dakshiṇā*=*sa-snehā*. *Bhāgyeshu*, the Beng. and S. have *bhogeshu*=*sukheshu*, 'in enjoyments,' 'in pleasures,' in which case *anutsekinī* will mean 'not given to excess.' The latter word is literally 'spouting up' like a fountain. Compare *anutseko lakshmyām*, Bhartṛi-h. ii. 54. *Padam*=*śabdam*, 'a title,' S.;=*vyavasāyam* or *pratishṭhām*, C. *Vāmāḥ*=*tad-viparīta-kāriṇyaḥ*, S.;=*tād-viruddhāḥ*, C.

[1] 'Lay to heart,' 'treasure up in thy heart,' 'ponder well.'

[2] 'Priyamvadā and my other dear friends;' cf. *Śārṅgarava-miśrāḥ*, p. 151, l. 7, with note. My own MS. and two others insert *kim*.

[3] 'Are to be given away in marriage.' Cf. p. 48, l. 10, with note thereon. *Ime api*; the dual terminations *ī*, *ū*, *e* do not coalesce with following vowels, see Gram. 38; Pāṇ. i. 1, 11.

[a] चन्दणलदा विअ देसन्तरे जीविअं धारइस्सं[1]।

काश्यपः।

वत्से। किमेवं कातरासि।

अभिजनवतो भर्तुः श्लाघ्ये स्थिता गृहिणीपदे
विभवगुरुभिः कृत्यैस्तस्य प्रतिक्षणमाकुला।
तनयमचिरात्प्राचीवार्कं प्रसूय च पावनं
मम विरहजां न त्वं वत्से शुचं गणयिष्यसि[2] ॥९९॥

॥ शकुन्तला पितुः पादयोः पतति ॥

[a] चन्दनलतेव देशान्तरे जीवितं धारयिष्यामि।

---

[1] 'How now, removed from my foster-father's side, like a tendril of the sandal-tree uprooted from the slopes of Malaya, shall I support life in a strange place?' The Candana or sandal tree (σάνταλον), Sirium Myrtifolium, is 'a large kind of myrtle with pointed leaves,' the wood of which affords many highly esteemed perfumes, unguents, &c., and is celebrated for its delicious scent. It is found chiefly on the slopes [*taṭa, upatyakā*, Raghu-v. iv. 46, 48] of the Malaya mountains, which are thence called *Candanācala*, the tree being sometimes called *Malaya-ja*, 'Malaya-born.' Frequent allusion is made to this tree being infested by snakes (see Raghu-v. iv. 48; Hitop. l. 1582). *Tara*, of which the Sanskṛit equivalent is probably *taṭa*, is the reading of all the Deva-n. MSS. It is synonymous with *utsanga*, 'the slope of a hill,' so that *Malayasya utsangāt* exactly answers to *tātasya-aṅkāt* [*aṅka=utsanga*, Amara-k. iv. 1, 4]. *D* and *r* are certainly interchangeable in Sanskṛit and Prākṛit, and the substitution of *ḍ* for *ṭ* is usual. *L*, however, is the more common substitute, and it might be supposed that *Malaya-tara* was for *Malaya-tala=Malayasya upatyakā*, Raghu-v. iv. 46.

[2] 'Stationed in the honourable post of wife to a nobly-born husband; (and) incessantly [every moment] distracted with his affairs important from his dignity; having very shortly given birth to a pure son, like as the Eastern-quarter (gives birth to) the Sun, thou wilt not take account, O daughter, of the sorrow produced by separation from me.' *Abhijana-*

Verse 99. HARIṆĪ (a variety of ATYASHṬI). See verse 66.

काश्यपः ।

यदिच्छामि ते तदस्तु ।

शकुन्तला ॥ सख्यावुपेत्य ॥

[a]हला । दुवेवि मं समं एव्व परिस्सजह ।

सख्यौ ॥ तथा कृत्वा ॥

[b]सहि । जइ णाम सो राआ पच्चहिण्णाणमन्थरो भवे ।
तदो से इमं अत्तणामहेअङ्कि[1]अं अङ्गुलीअअं दंसेहि ।

शकुन्तला ।

[c]इमिणा सन्देहेण वो आकम्पिदम्हि ।

सख्यौ ।

[d]मा भाआहि । अदिसिणेहो[2] पावसङ्की ।

शार्ङ्गरवः ।

युगान्तरमारूढः[3] सविता । त्वरतामत्रभवती ।

[a] हला । द्वे अपि मां सममेव परिष्वजेयाम् । [b] सखि । यदि नाम स राजा प्रत्यभिज्ञानमन्थरो भवेत् । ततोऽस्मायिदमात्मनामधेयाङ्कितमङ्गुलीयकं दर्शय । [c] अनेन सन्देहेन वामाकम्पितास्मि । [d] मा बिभीहि । अतिस्नेहः पापशङ्की ।

---

vato=kulīnasya, see p. 15, n. 1. *Ākulā=vyagrā*, 'perplexed,' 'intently occupied,' S.; *=sasambhramā*, 'bewildered,' K. *Acirāt=gamanānvyavahita-samaye*, 'immediately on thy arrival.' *Prāćī iva*, &c.=*yathā pūrva-dik pavitra-janakaṃ sūryam*, S.

[1] *Ātmanāmadheyānkita*, see p. 53, notes 2 and 3, and p. 140, l. 9, with note 2.

[2] 'Excessive affection is apt to suspect evil.' *Ati-snehaḥ*, so reads the Taylor MS. as well as my own, supported by K. S. observes, *tathā ćoktaṃ kirāte, prema paśyati bhayāni apade 'pi*, 'and so it is said in the Kirātārjunīya, "Affection sees causes of alarm [or dangers], even without foundation."' (See Kirāt. ix. 70.)

[3] 'The sun has ascended to another division (of the sky).' The Mackenzie MS. has *yugāntam adhirūḍhaḥ*; the Calcutta edition, *dūram adhirūḍhaḥ*; Chézy, *gaganāntaram adhirūḍhaḥ*. According to C., *yuga*

शकुन्तला ॥ आश्रमाभिमुखी स्थित्वा ॥

[a] ताद । कदा णु भूओ तवोवणं पेक्खिस्सं ।

काश्यपः ।

श्रूयताम् ।

भूत्वा चिराय चतुरन्तमहीसपत्नी
दौष्यन्तिमप्रतिरथं तनयं निवेश्य ।
भर्त्रा तदर्पितकुटुम्बभरेण सार्धं
शान्ते करिष्यसि पदं पुनराश्रमेऽस्मिन् [1] ॥१००॥

[a] तात । कदा तु भूयस्तपोवनं प्रेक्षिष्ये ।

---

is by some considered equivalent to *prahara*, 'a division of the day, comprising one-eighth of the sun's diurnal revolution, or three hours;' by others, to *hasta-ćatushṭaya*, 'a space of four cubits.' Dr. Boehtlingk translates, 'The sun has already entered the afternoon-quarter of the heavens.'

[1] 'Having become for a long time the fellow-wife of the Earth bounded by the four cardinal-points, having settled-in-marriage thy matchless-warrior son Daushyanti, in-company-with thy husband (Dushyanta), who shall have (first) transferred the cares of government [the burthen of family-cares] to him, thou shalt again set foot in this tranquil hermitage.' *Ćatur-anta-mahī* seems to be equivalent to *ćatur-dig-anta-mahī*, i. e. 'the earth as far as the four quarters,' 'the entire earth.' The Beng. have a parallel phrase *sa-dig-anta-mahī*. K. explains it by *ćatvāraḥ antāḥ yasyāḥ sā*. Cf. p. 124, l. 4. *Daushyanti* is a regular patronymic, from Dushyanta, as Dākshi, 'a descendant of Daksha,' from Daksha; Aindri from Indra, &c. (see Gram. 81. X). *A-pratiratham*=*asat-paripanthinam*, 'having no antagonist,' =*a-pratirathikam*, K.; *ratha* being put for *rathika* or *rathin*, 'a warrior who fights from a chariot.' *Niveśya*=*vivāhya*, 'having caused to marry,' K.; *niviś* has this sense in Mahā-bh. i. 7138. *Tad* refers to *Daushyanti*. *Arpita*, &c., cf. *aham api sūnau vinyasya rājyam*, Vikram., Act V; also

---

Verse 100. VASANTA-TILAKĀ (a variety of ŚAKVARĪ). See verses 8, 27, 31, 43, 46, 64, 74, 80, 82, 83, 91, 93, 94, 95.

गौतमी ।

[a] जादे । परिहीअदि गमणवेला । णिवत्तेहि पिदरं । अहवा चिरेणवि पुणो पुणो एसा एवं मन्तइस्सदि । णिवत्तदु भवं ।[1]

काश्यपः ।

वत्से । उपरुध्यते तपोऽनुष्ठानम् ।[2]

शकुन्तला ॥ भूयः पितरमाश्लिष्य ॥

[b] तवच्चरणपीडिदं तादसरीरं । ता मा अदिमेत्तं मम किदे उक्कण्ठ ।[3]

[a] जाते । परिहीयते गमनवेला । निवर्तय पितरम् । अथवा चिरेणापि पुनः पुनरेवैवं मन्त्रयिष्यते । निवर्ततां भवान् । [b] तपश्चरणपीडितं तातशरीरम् । तन्मात्रिमात्रं मम कृत उत्कण्ठस्व ।

Manu vi. 2, 3, 'When the father of a family perceives his own wrinkles and grey hair, committing the care of his wife to his sons, or accompanied by her, let him repair to the woods,' i. e. let him enter upon the third quarter of his life, that of a hermit (see p. 157, n. 1 at the end). *Śānte*, cf. p. 20, l. 12. *Karishyasi padam*, cf. p. 145, n. 2 at the end.

[1] 'Allow the father to return; or rather, (since) even for a long time she will go on talking again and again in this manner, let your reverence return,' i. e. return at once yourself, without asking her permission. To depart without asking leave, is contrary to all Hindū ideas of politeness. *Athavā*, see p. 30, n. 3.

[2] 'The prosecution of (my) devotions is interrupted (by this detention).' Compare in Vikram., Act V, *uparudhyate me āśrama-vāsa-dharmaḥ*.

[3] 'Therefore do not beyond measure sorrow on my account.' *Ukkaṇṭha* for Sanskrit *utkaṇṭha* or *utkaṇṭhasva* is the reading of my own MS. *Mā ukkaṇṭhidum* seems questionable. K. has *Bhūyo 'pi tapaś-charaṇa-pīḍitaṃ tātasya śarīram atimātram mama kṛite utkaṇṭhitam bhavishyati*.

काश्यपः ॥ सनिःश्वासम् ॥

शममेष्यति मम शोकः कथं नु वत्से त्वया चरितपूर्वम्।
उटजद्वारविरूढं नीवारबलिं विलोकयतः ॥१०१॥

गच्छ। शिवास्ते पन्थानः सन्तु।

॥ निष्क्रान्ता शकुन्तला सहयायिनश्च ॥

---

[1] 'How, my child, will the grief of me, looking at the oblation of rice-grains formerly offered by thee, germinating at the door of the cottage, ever be assuaged [ever go to assuagement]?' *Ćarita*, so reads the Colebrooke MS.; the others have *raćita-pūrvam=purā-vihitam*, S. *Ćarita* is supported by *ćaru*, 'an oblation of rice.' The *bali*, or *gṛiha-bali*, is a particular kind of offering, identical with the *bhūta-yajña*, i. e. a sacrifice for all creatures, but especially in honour of those demigods and spiritual beings called *gṛiha-devatāḥ*, 'household deities,' which are supposed to hover round and protect households (Manu iii. 80), or to whom some particular part of the house is sacred. This offering was made by throwing up into the air (Manu iii. 90), in some part of the house, generally at the door (Manu iii. 88), the remains of the morning and evening meal of rice or grain; uttering at the same time a *mantra* or prayer to some of the inferior deities, according to the place in which it was made (Manu iii. 87, &c.), whether to Indra with his followers the Maruts, or to Kuvera with his followers the Guhyakas, Kinnaras, Yakshas, &c., or to the spirits of trees, waters, &c. (Manu iii. 88, 89). According to Colebrooke it might be presented with the following Paurāṇik prayer, 'May gods, men, cattle, birds, demigods, benevolent genii, serpents, demons, departed spirits, blood-thirsty savages, trees, and all who desire food given by me—may reptiles, insects, flies, and all hungry beings or spirits concerned in this rite, obtain contentment from this food left them by me!' It was sometimes offered by the women of the house, who might assist in any sacrifice, provided they abstained from repeating the Mantras (Manu iii. 121), and as the offering was intended for all creatures, even the animals were supposed to have their share in it (Manu iii. 92). In point of fact the crows, dogs, insects, &c. in the neighbourhood of the house were the real consumers of it (whence *bali-puṣhṭa*, *bali-bhuj*, *gṛiha-bali-bhuj*, as names

---

Verse 101. ĀRYĀ or GĀTHĀ. See verse 2.

⏑ ⏑ – | ⏑ ⏑ ⏑ ⏑ | – – ‖ ⏑ – ⏑ | – – | ⏑ – ⏑ | ⏑ ⏑ – | –
⏑ ⏑ – | – ⏑ ⏑ | – – ‖ – – | ⏑ ⏑ – | ⏑ | – ⏑ ⏑ | –

सख्यौ ॥ शकुन्तलां विलोक्य ॥

[a] हद्धी हद्धी । अन्तलिहिदा[1] सउन्दला वणराईए ।

काश्यपः ॥ सनिःश्वासम् ॥

अनसूये । गतवती वां सहधर्मचारिणी । निगृह्य शोकमनुगच्छतं मां प्रस्थितम् ।

उभे ।

[b] ताद । सउन्दलाविरहिदं सुण्णं विअ तवोवणं कहं पविसामो ।

काश्यपः ।

स्नेहप्रवृत्तिरेवंदर्शिनी[2]। ॥ सविमर्शं परिक्रम्य ॥ हन्त[3] भोः। शकुन्त-

[a] हा धिक् हा धिक् । अन्तर्हिता शकुन्तला वनराज्या । [b] तात । शकुन्तलाविरहितं शून्यमिव तपोवनं कथं प्रविशावः ।

---

of a crow, crane, sparrow, &c., compare Hitop. l. 1076), and such of the grains as escaped being devoured by them would be likely to germinate about the threshold. This *bali* formed one of the five great religious rites, sometimes called sacraments, which the householder who maintained a perpetual fire (see p. 148, n. 1) had daily to perform (Manu iii. 67, iv. 21). See Indian Wisdom, pp. 203, 251. It was in honour of all creatures of every description, but particularly of those not provided for by the other four sacrifices. It might have reference, however, to the deities and beings honoured in the other sacraments. That it had especial reference to the *Gṛiha-devatāḥ* is indicated in Manu iii. 117, with commentary; and in the Mṛićchakaṭikā, where Ćārudatta, after fulfilling the Deva-kārya, or second of the five rites (cf. p. 140, l. 17), is described as offering the *bali* to the household gods around the threshold. His speech, as he offers it, corresponds remarkably with that of Kāśyapa, *Yāsām baliḥ sapadi mad-gṛiha-dehalīnām, haṃsaiś ća sārasa-gaṇaiś ća vilupta-pūrvaḥ, tāsv eva sam-prati virūḍha-tṛiṇāṅkurāsu, vījāñjaliḥ patati kīṭa-mukhāvalīḍhaḥ.* See Mṛićch., Act I, verse 1. For *śivās te panthānaḥ santu*, in the next line, see p. 163, n. 1 at the end.

[1] So read all the Deva-n. for *antarihidā*, cf. p. 140, l. 6.

[2] 'The course of affection views it thus.' The Beng. MSS. have *snehā-vṛittir*, and one (I. O. 1050) *evaṃ śaṃsinī* for *evaṃ darśinī*. *Yasmin vishaye sneho bhavati tad-asānnidhyād etādṛiśa eva kramo bhavati*, S.

[3] *Hanta*, here an exclamation of joy (*harshe*, S.)

लां पतिकुलं विसृज्य लब्धमिदानीं स्वास्थ्यम्[1]। कुतः।

अर्थो हि कन्या परकीय एव
तामद्य सम्प्रेष्य परिग्रहीतुः।
जातो ममायं विशदः प्रकामं
प्रत्यर्पितन्यास इवान्तरात्मा[2] ॥१०२॥

॥ इति निष्क्रान्ताः सर्वे ॥

॥ चतुर्थोऽङ्कः ॥

---

[1] 'My natural serenity of mind,' 'my natural good spirits.' A load of anxiety is taken off my mind.

[2] 'Verily a girl is another's property. Having to-day sent her to her husband, this my conscience has become quite clear, as if (after) restoring a deposit.' *Kanyā-rūpo 'rthaḥ*, &c., 'the property consisting of a girl belongs to another,' S. and C. *Parigrahītuḥ=pariṇetuḥ.* Hence *parigraha*, 'a wife,' see p. 124, l. 3. The ceremonies of marriage are described by Colebrooke in the Asiatic Researches, vol. vii. pp. 288–311, thus:—The bridegroom goes in procession to the house of the bride's father. The bride is given to him by her father, and their hands, on which turmeric has been previously rubbed, are bound together with Kuśa grass. The bridegroom next makes oblations to the sacred household fire, and the bridegroom drops rice into it. The bridegroom solemnly takes her hand in marriage (whence he is called *pāṇi-grahītṛi*, and marriage *pāṇi-grahaṇa*), and leads her round the sacred fire (whence he is called *pariṇetṛi*). The bride steps seven times, and the marriage is then irrevocable. *Viśadaḥ=prasannaḥ*, 'serene,' 'tranquil,' K.; *=susthaḥ*, S. Cf. *manasaḥ prasādaḥ*, Vikram., Act V. *Prakāmam=atyartham*, see p. 108, n. 3. The Beng. reading is *jāto 'smi samyag viśadāntarātmā, ćirasya nikshepam ivārpayitvā.*

Verse 102. INDRA-VAJRĀ (a variety of TRISHṬUBH), containing eleven syllables to the Pāda or quarter-verse, each Pāda being alike.

– – ∪ – – ∪ ∪ ∪ – ∪ – – ||

॥ अथ पञ्चमोऽङ्कः ॥

॥ ततः प्रविशत्यासनस्थो राजा विदूषकश्च ॥[1]

विदूषकः ॥ कर्णौ दत्त्वा ॥

[a]भो भो वअस्स । सङ्गीदसालन्तरे अवधाणं देहि । कलविसुद्धाए गीदीए सरसञ्जोओ सुणीअदि[2] । जाणे । तत्तहोदी हंसवदिआ वण्णपरिअअं करेदित्ति[3] ।

राजा ।

तूष्णीं भव । यावदाकर्णयामि ।

[a] भो भो वयस्य । सङ्गीतशालान्तरेऽवधानं देहि । कलविशुद्धायां गीत्यां स्वरसंयोगः श्रूयते । जाने । तत्रभवती हंसपदिका वर्णपरिचयं करोतीति ।

---

[1] In the Beng. MSS. the speech of the Chamberlain at p. 186 commences the Act.

[2] 'Turn (thy) attention to the interior of the music-hall. In a soft and clear song harmonious sounds are heard [the union of notes is heard].' *Īśvarāṇāṃ yatra nṛityādikam bhavati sā saṃgīta-śālā*, 'a music-saloon is a place where dancing &c. is performed before princes,' S'. *Avadhānam*, K. has *avadhāraṇam*. *Gītyām=dhruvāyām*, K. Prākṛit *gīdīe* may stand for instr., gen., or loc. cases. *Svara-saṃyoga*, K. has *svara-yoga*. Both expressions occur in Mṛiećh. (p. 33, l. 2; p. 94, l. 1; p. 222, l. 5; p. 339, l. 9), and in the Mālavik. (p. 67, l. 6, with note).

[3] 'Is practising singing,' lit. 'is making acquaintance with the Varṇas.' *Paricaya=abhyāsa*, C. *Varṇa*, 'the order or arrangement of a song.' It may also mean 'a musical mode.' These modes are numerous, personified either as male (Rāga) or female (Rāgiṇī). According to S'. and C., the Varṇas intended here are of four kinds, the first two corresponding with the division of the Bhāvas, or 'affections.' *Gītishu ćatvāra varṇā bhavanti yad āha Bharataḥ, Sthāyī tathaiva Saṅćārī tathā Rohāvarohiṇau. Varṇāś ćatvāra evaite kathitāḥ sarva-gītishu.*

॥ आकाशे गीयते ॥

[a] अहिणवमहुलोलुवो तुमं
तह परिचुम्बिअ चूअमञ्जरिं ।
कमलवसइमेत्तणिव्वुदो
महुअर विम्हरिदोसि णं कहं ॥ १०३ ॥

राजा ।

अहो रागपरिवाहिणी[2] गीतिः ।

[a] अभिनवमधुलोलुपस्त्वं तथा परिचुम्ब्य चूतमञ्जरीम् ।
कमलवसतिमात्रनिर्वृतो मधुकर विस्मृतोऽस्येनां कथम् ॥

---

[1] 'O Bee, how (can it be) that thou, eagerly-longing for fresh honey, after having so kissed the mango-blossom, shouldst (now) be forgetful of it, being altogether satisfied with (thy) dwelling in the lotus!' *Ćūta-mañjarī=āmra-kalikā*, S. Cf. in Vikram., Act II, *Īshad-baddha-rajaḥ-kaṇāgra-kapiśā ćūte navā mañjarī. Kamala-vasati=kamalāvasthiti*, C. The fondness of the bee (which in Sanskṛit is masculine) for the lotus is so great that he will remain for a long time in the interior of the flower. Cf. *na pankajaṃ tad yad alīna-shaṭpadam*, 'that is not a lotus which has no bee clinging to it,' Bhaṭṭi-k. ii. 19; also *guñjad-dvirepho 'yam ambuja-sthaḥ*, 'the murmuring bee remaining in the lotus,' Ṛitu-s. vi. 15; and *idaṃ ruṇaddhi mām padmam antaḥ-kvaṇita-shaṭpadam*, Vikram., Act IV. *Madhu-kara*, see p. 33, n. 1. *Vismṛita*, see p. 161, n. 3. In Prākṛit, two forms *mar* and *sumar* are used for *smṛi;* the first becomes *mhar* after a preposition (as in *vimhao* for *vismayaḥ*, Vararući iii. 32); but *vimarido* would be equally correct according to Vararući iii. 56. K. observes that, under the figure of a bee, Haṅsapadikā covertly reproves the king for having forgotten her. S. and C. call this verse a *Praććhādaka*, and the following from Kavi-kaṇṭhahāra is quoted, *anyāsaktam patim matvā prema-viććheda-manyunā vīṇā-puraḥsaraṃ gānaṃ striyāḥ praććhādako mataḥ.*

[2] 'Oh, what an impassioned strain!' lit. a song overflowing with affection or passion. *Rāga-parivāhiṇī=anurāga-nishyandinī*, S.; *=kāma-sampūrṇā*, K. Cf. p. 89, n. 3.

Verse 103. APARA-VAKTRĀ. See verse 90.

विदूषकः ।

[a] किं दाव गीदीए अवगदो अक्खरत्थो[1] ।

राजा ॥ स्मितं कृत्वा ॥

सकृत्कृतप्रणयोऽयं जनः । तदस्या देवीं वसुमतीमन्तरेण महदुपालम्भनं गतोऽस्मि[2] । सखे माठव्य । मद्वचनादुच्यतां हंसपदिका । निपुणमुपालब्धोऽस्मीति ।

विदूषकः ।

[b] जं भवं आणवेदि । ॥ उत्थाय ॥ [c] भो वअस्स । गहीदस्स ताए परकीएहिं हत्थेहिं सिहण्डए ताडीअमाणस्स अच्छराए वीदराअस्स विअ णत्थि दाणिं मे मोक्खो[3] ।

[a] किं तावद्गीत्या अवगतोऽक्षरार्थः । [b] यद्भवानाज्ञापयति । [c] भो वयस्य । गृहीतस्य तया परकीयैर्हस्तैः शिखण्डके ताड्यमानस्याप्सरसा वीतरागस्येव नास्तीदानीं मे मोक्षः ।

---

[1] 'The meaning of the words,' lit. 'of the letters or syllables.'

[2] 'This person [i. e. I] once made love (to her); therefore I am incurring her severe censure on account of the queen Vasumatī.' *Kṛita-praṇayaḥ* = *kṛita-premā*. *Ayaṃ janaḥ*, i. e. *mad-rūpaḥ*, 'consisting of me,' S'. Cf. p. 144, n. 2. *Vasumatī* is a name for the earth, cf. p. 124, n. 1. *Antareṇa*, with accusative, see p. 81, n. 2. After *kṛita-praṇayo 'yaṃ janaḥ*, the Calcutta edition adds *ity aksharārthaḥ*, 'such is the meaning of the words.'

[3] 'There is not now any liberation for me (suffered to be) seized by her with the hands of others by-the-hair-on-the-crown-of-my-head (and) beaten, any more than for a sage-with-suppressed-passions (if taken unawares) by a lovely-nymph.' *Śikhaṇḍaka* is 'the lock of hair left on the crown of the head at tonsure.' This was the only portion of hair suffered to remain on the head of a Brāhman; but in the case of the military class, three or five locks, called *kāka-pakshāḥ*, were left on each side. The two ceremonies of tonsure are included by Manu among the twelve S'aṇskāras or rites which every Brāhman had to undergo. The first, or *cūḍā-karaṇa*, took place from one to three years old, generally after teething (Manu ii. 35); the second, or final tonsure *keśānta*, in the sixteenth year from conception (ii. 65). *Moksha* has here a double sense, 'liberation of the body

राजा ।

गच्छ । नागरिकवृत्त्या[1] सञ्ज्ञापयैनाम् ।

विदूषकः ।

[a] का[2] गई । ॥ इति निष्क्रान्तः ॥

राजा ॥ आत्मगतम् ॥

किं नु खलु गीतार्थमाकर्ण्येष्टजनविरहादूतेऽपि बलवदुत्कण्ठितोऽस्मि । अथवा ।

रम्याणि वीक्ष्य मधुरांश्च निशम्य शब्दा-
न्पर्युत्सुकीभवति यत्सुखितोऽपि जन्तुः ।
तच्चेतसा स्मरति नूनमबोधपूर्वं
भावस्थिराणि जननान्तरसौहृदानि[3] ॥ १०४ ॥

॥ इति पर्याकुलस्तिष्ठति ॥

[a] का गतिः ।

---

from danger,' and 'liberation of the soul from further transmigration;' see n. 3 below. The last was the great object of sages and devotees in their bodily mortifications, but was often obstructed by the seductive artifices of Indra's nymphs (see p. 45, n. 1).

[1] 'In the courtly [fashionable] style.' *Pravīṇasya rityā*, K. *Nāgarika* here means more than 'polite.' It implies 'insincerity,' as when a man shews exaggerated attention to his first mistress, while he is courting some one else.

[2] *Kā gatiḥ*, see p. 62, l. 2, with note 2.

[3] 'When a being (in other respects) happy becomes conscious-of-an ardent-longing on seeing charming objects and hearing sweet sounds, then in all probability, without being aware of it, he remembers with his mind the friendships of former births, firmly-rooted in his heart.' *Ramyāṇi*, i. e. *vastūni*, S'. For *ramyāṇi* K. has *rūpāṇi* and *sthitāni* for *sthirāṇi*. *A-bodha-pūrvam*, 'without any previous intimation or suggestion,' 'unconsciously.' Compare the similar expressions, *a-mati-pūrvam*, *a-buddhi-pūrvam*, 'without any previous idea.' The doctrine of transmigration is an essential dogma

---

Verse 104. VASANTA-TILAKĀ (a variety of ŚAKVARĪ). See verses 8, 27, 31, 43, 46, 64, 74, 80, 82, 83, 91, 93, 94, 95, 100.

॥ ततः प्रविशति कञ्चुकी ॥

कञ्चुकी[1]।

अहो नु खल्वीदृशीमवस्थां प्रतिपन्नोऽस्मि।
आचार इत्यवहितेन मया गृहीता
या वेत्रयष्टिरवरोधगृहेषु राज्ञः।
काले गते बहुतिथे मम सैव जाता
प्रस्थानविक्लवगतेरवलम्बनार्थम्[2] ॥ १०५ ॥

---

of the Hindū religion; see Indian Wisdom, p. 67. Dim recollections of occurrences in a former life are supposed occasionally to cross the mind, and the present condition of every person is supposed to derive its character of happiness or misery, elevation or degradation, from the virtues or vices of a previous state of being. The consequences of actions in a former birth are called *vipāka*.

[1] The Kañćukin or Chamberlain was the attendant on the women's apartments. S'. and C'. quote the following from Bharata: *Antaḥpura-ćaro vṛiddho vipro guṇa-gaṇānvitaḥ sarva-kāryārtha-kuśalaḥ kañćukīti abhidhīyate. Jarā-vaiklavya-yuktena viśed gātreṇa kañćukī*, 'the character styled Kañćukin is an attendant in the inner apartments, an old man, a Brāhman, endowed with numerous good qualities, and a clever man of business. The Kañćukin should enter with a body decrepit and tottering from age.' Compare this scene, and the speeches of the Chamberlain, with the opening scene of Act III. of Vikram.

[2] 'The wand [staff of office] which was assumed by me, having to watch over the royal female apartments, thinking, "It is a matter of form," much time having elapsed since then, that same (wand) has become (indispensable, or a useful crutch) for the support of me whose step falters in walking.' *Vetra-yashṭi*, properly 'a cane-stick,' used as a badge of office, like the gold stick or black rod in European courts. *Avahitena*, lit. 'attentive,' 'careful,' 'watchful,' i. e. appointed to a careful superintendence or watch. So read all the Deva-n.; the Beng., with S'., have *adhikṛitena*, i. e. 'by me set over,' &c. *Avarodha-gṛiheshu*, see p. 21, n. 3. *Bahutithe* = *bahu-sankhye*, Chézy. K. observes that *bahu* is here treated as a numeral, *titha* being a kind of ordinal suffix (Gram. p. 66. LXIII).

Verse 105. VASANTA-TILAKĀ (a variety of ŚAKVARĪ). See verses 8, 27, 31, 43, 46, 64, 74, 80, 82, 83, 91, 93, 94, 95, 100, 104.

भोः। कामं धर्मकार्यमनतिपात्यं देवस्य। तथापीदानीमेव धर्मासनादुत्थितस्य पुनरुपरोधकारि कथञ्चिद्यागमनमस्मै नोत्सहे निवेदयितुम्। अथवा। अविश्रामोऽयं लोकतन्त्राधिकारः[1]। कुतः।

भानुः सकृद्युक्ततुरङ्ग एव
रात्रिन्दिवं गन्धवहः प्रयाति।
शेषः सदैवाहितभूमिभारः
षष्ठांशवृत्तेरपि धर्म एषः[2] ॥१०६॥

यावन्नियोगमनुतिष्ठामि। ॥ परिक्रम्यावलोक्य च ॥ एष देवः।

प्रजाः प्रजाः स्वा इव तन्वयित्वा
निषेवते श्रान्तमना विविक्तम्।

---

[1] 'But (why should I hesitate?) this office of supporting the world does not (admit of) repose.' *Athavā*, see p. 30, n. 3. *Loka-tantra*, one meaning of *tantra* is 'supporting a family.'

[2] 'Because the Sun having but once (and once) only yoked his steeds travels onwards; night and day the wind (also travels); Śesha has the burden of the earth always resting (on his head). This also is the duty of him whose subsistence is on the sixth part (of the produce of the soil).' *Kutaḥ*, see p. 55, n. 2. *Bhānu*, 'the Sun;' see p. 142, n. 3. 'In other chariots the horses are yoked again after an interval of rest, but the horses of the Sun are allowed no repose,' Ś. *Sūrya evambhūtaḥ san prayāti*, Ś. *Gandha-vaha*, lit. 'the scent-bearer,'=*vāyu*, Ś. *Śesha*=*Ananta*, a mythological serpent, the personification of eternity (*ananta-tā*) and king of the Nāgas or snakes who inhabit the lowermost of the seven Pātālas or infernal regions. His body formed the couch of Vishṇu, reposing on the waters of Chaos, whilst his thousand heads were the god's canopy. He is also said to uphold the world on one of his heads. He has become incarnate at various times, especially in the god Bala-rāma, the elder brother of Kṛishṇa. *Āhita*, see p. 149, n. 1. *Shashṭhāṅśa-vṛitter*, see p. 84, n. 1.

Verse 106. INDRA-VAJRĀ (a variety of TRISHṬUBH), containing eleven syllables to the Pāda or quarter-verse, each Pāda being alike.

– – ∪ – – ∪ ∪ – ∪ – – ||

यूथानि सञ्चार्य रविप्रतप्तः
शीतं दिवा स्थानमिव द्विपेन्द्रः ॥१०७॥[1]

॥ उपगम्य ॥ जयतु जयतु देवः । एते खलु हिमवतो गिरेरुपत्यकारण्यवासिनः काश्यपसन्देशमादाय सस्त्रीकास्तपस्विनः सम्प्राप्ताः । श्रुत्वा देवः प्रमाणम्[2] ।

राजा ॥ सादरम् ॥

किं काश्यपसन्देशहारिणः ।

कञ्चुकी ।

अथ किम्[3] ।

राजा ।

तेन हि मद्वचनाद्विज्ञाप्यतामुपाध्यायः सोमरातः । अमूनाश्रमवासिनः श्रौतेन विधिना[4] सत्कृत्य स्वयमेव प्रवेशयितुमर्हतीति । अहमप्यत्र तपस्विदर्शनोचिते प्रदेशे स्थितः प्रतिपालयामि ।

---

[1] 'Having supported his subjects as his own children, wearied in mind he seeks seclusion, as the chief of the elephants scorched by the sun, after conducting the herds to their pastures, in the (heat of the) day (seeks) a cool spot.' *Tantrayitvā*, from a nominal verb *tantraya* (see p. 187, n. 1), is the reading of all the Beng. MSS., supported by K.; two of the Deva-n., *śāntvayitvā;* the Mackenzie, *harshayitvā*. *Śrānta-manāḥ* is the reading of the Mackenzie, supported by K.; the other Deva-n., *śānta-manāḥ*, 'composed in mind.' *Sañcārya*, lit. 'having caused to move about or graze,'=*bhramayitvā*, S'. *Vivikta=vijana-pradeśa*. *Divā=madhyāhne*, 'in the middle of the day.' *Dvipendraḥ=hasti-rājaḥ=yūtha-nāthaḥ*, 'a large elephant, the leader of a wild herd.'

[2] 'Having heard, your Majesty must decide (what is to be done).' K. supplies *yat kartavyam*. *Pramāṇam*, see p. 31, n. 1 at the end.

[3] *Atha kim* is used *svīkāre*, S'. (see p. 46, n. 3).

[4] 'In the form enjoined by the scriptures' (=*śruti-bodhitena prakāreṇa*, S'.)

Verse 107. UPAJĀTI or ÁKHYĀNAKĪ (a variety of TRISHṬUBH). See verse 41.

कञ्चुकी ।

यदाज्ञापयति देवः । ॥ इति निष्क्रान्तः ॥

राजा ॥ उत्थाय ॥

वेत्रवति । अग्निशरणमार्गमादेश्य[1] ।

प्रतीहारी ।

[a] इदो इदो देवो ।

राजा ॥ परिक्रामति । अधिकारखेदं निरूप्य ॥

सर्वः प्रार्थितमर्थमधिगम्य सुखी सम्पद्यते जन्तुः । राज्ञां तु चरितार्थता[2] दुःखोत्तरैव[3] ।

औत्सुक्यमात्रमवसादयति प्रतिष्ठा
क्लिश्नाति लब्धपरिपालनवृत्तिरेव ।
नातिश्रमापनयनाय न च श्रमाय
राज्यं स्वहस्तधृतदण्डमिवातपत्रम् ॥ १०८ ॥

[a] इत इतो देवः ।

---

[1] *Agni-śaraṇa*, see p. 148, n. 1. *Mārga*, see p. 161, l. 4, with note.

[2] 'The attainment of the object (of their ambition) is followed by pain.' *Caritārthatā=rājya-prāptiḥ*, 'the attainment of the throne,' S'. *Duḥkhottarā=kheda-saṃvalitā*, 'encompassed with trouble,' S'.

[3] 'The-attainment-of-the-object-of-ambition satisfies anxious longing merely; the very business of guarding what has been obtained, harasses. Royalty [the office of king], like a parasol, the handle of which is held in the hand, is not for the removal of great fatigue without leading to fatigue.' *Autsukyam=utkaṇṭhā*, 'longing,' 'eager desire;' such as *kadā rājā bhavishyāmītyādi*, 'when shall I become king, &c.?' *tam eva [illegible] dāyinī pratishṭhā avasādayati*, 'that (desire) certainly the harassing attainment-of-the-highest-rank allays,' Ć. S'. reads *pratishṭhām*, and places it in opposition to *autsukya-mātram*, making *rājyam* nom. to *avasādayati*. The Beng. MS. [I. O. 1060] gives *pratishṭhām* in the margin, and this reading is certainly supported by a parallel passage (*sādhayantī pratishṭhām*, &c.) in the beginning of Act III. of Vikram. C. also notices

---

Verse 108. VASANTA-TILAKĀ (a variety of ŚAKVARĪ). See verses 8, 27, 31, 43, 46, 64, 74, 80, 82, 83, 91, 93, 94, 95, 100, 104, 105.

॥ नेपथ्ये ॥

वैतालिकौ ।

विजयतां देवः ।

प्रथमः ।

स्वसुखनिरभिलाषः खिद्यसे लोकहेतोः
प्रतिदिनमथवा ते वृत्तिरेवंविधैव ।

---

this reading, but adopts the one in the text and censures the interpretation of S'. *Pratishṭhā* may have the sense I have given, which agrees with the *prārthitārthādhigamaḥ* and *ćaritārthatā* of the preceding lines. *Ati-śrama* may either refer to the trouble which the king has undergone in arriving at the object of his ambition, or to the troubles of his subjects which it is his office to remove. In the latter case *na ća śramāya* will mean 'without leading to personal trouble or weariness.' The Indian *ćhattra*, or parasol, from the shelter it affords has been chosen as one of the insignia of royalty. It is very heavy, and being fixed on a long pole greatly fatigues the person holding it. It is always borne by a servant; but here the king is figuratively made to bear it himself, so that he cannot give shelter to himself and others, without undergoing great personal fatigue. *Na ća śramāya* is found in all the Deva-n. MSS.; the Beng. have *yathā śramāya*, i. e. 'royalty does not so much lead to the removal of fatigue as to fatigue.' According to K., who repeats the first negative before *na ća śramāya*, the two negatives are here employed affirmatively, i. e. to affirm that royalty does lead to personal fatigue. 'It is not for the removal of great fatigue and not not for fatigue.' Cf. a similar use of two negatives on p. 24, l. 10, with note.

[1] *Vaitālika*=*vandin*, 'a herald,' Ć.; =*stuti-pāṭhaka*, 'a panegyrist,' S'. He was a kind of herald or crier, whose duty was to announce, in measured verse, the fixed periods into which the king's day was divided. The strain which he poured forth usually contained allusions to incidental circumstances. In Vikram. and Ratn., only one Vaitālika appears, but here and in the Mālavik. there are two. In Vikram., Act II, he announces the sixth hour or watch of the day, about two or three o'clock, at which period alone the king is allowed to amuse himself. From the Daśa-kumāra it appears that a king's day and night were supposed to be divided into eight portions of one hour and a half, reckoned from sunrise, for distributing which strict directions are given, thus: Day—1. The king being dressed, is to audit accounts; 2. He is to pronounce judgment in appeals; 3. He is to breakfast; 4. He is to receive and make presents;

अनुभवति हि मूर्ध्ना पादपस्तीव्रमुष्णं
शमयति परितापं छायया संश्रितानाम् [1] ॥१०९॥

द्वितीयः ।

नियमयसि विमार्गप्रस्थितानात्तदण्डः
प्रशमयसि विवादं कल्पसे रक्षणाय ।
अतनुषु विभवेषु ज्ञातयः सन्तु नाम
त्वयि तु परिसमाप्तं बन्धुकृत्यं प्रजानाम् [2] ॥११०॥

---

5. He is to discuss political questions with his ministers; 6. He is to amuse himself; 7. He is to review his troops; 8. He is to hold a military council. Night—1. He is to receive the reports of his spies and envoys; 2. He is to sup or dine; 3. He is to retire to rest, after the perusal of some sacred work; 4 and 5. He is to sleep; 6. He is to rise and purify himself; 7. He is to hold a private consultation with his ministers, and instruct his officers; 8. He is to attend upon the *Purohita*, or family priest, for the performance of religious ceremonies. See Wilson's Hindū Theatre, vol. i. p. 209.

[1] 'Indifferent to thine own ease, thou endurest toil every day for the sake of (thy) people. But thy regular-business is of this very kind. For the tree suffers intense heat with its head (while) it allays by (its) shade the heat of those seeking (its) shelter.' *Athavā*, see p. 30, n. 3. *Vṛittir*, some of the Beng., supported by K. and S., have *sṛishṭir*.

[2] 'Having assumed the mace [sceptre] thou restrainest those who advance on the wrong road [set out on bad courses]; thou composest differences; thou art adequate to the protection (of thy people). Let kinsmen make their appearance forsooth in affluent circumstances [when there is abundant property], but in thee the whole duty of a kinsman is comprehended towards thy subjects.' *Ātta-daṇḍa=gṛihīta-daṇḍa; daṇḍa*, 'a magistrate's staff,' taken as a symbol of punishment and justice; it is sometimes 'the sceptre of a king;' hence *daṇḍa-dhara*, *daṇḍin*, 'staff-bearer,' &c., are names for Yama, the god of justice and lord of punishment. *Vimārga*, some have *kumārga*, 'bad ways.' *Kalpase = sampadyase*, K. Manu furnishes several examples of *klṛip* in the sense of 'to be sufficient,' 'to be fit' (see ii. 151, ii. 266, vi. 20; also Raghu-v. viii. 40).

Verses 109 and 110. MĀLINĪ or MĀNINĪ (a variety of ATI-ŚAKVARĪ). See verses 10, 19, 20, 38, 55.

राजा ।

[1]एते क्लान्तमनसः पुनर्नवीकृताः स्मः । ॥ इति परिक्रामति ॥

प्रतीहारी ।

[a]अहिणवसम्मज्जणससिरीओ सण्णिहिदहोमधेणू अग्गि-
सरणालिन्दो[2] । आरुहदु देवो ।

राजा ॥ आरुह्य परिजनांसावलम्बी तिष्ठति ॥

वेत्रवति । किमुद्दिश्य भगवता काश्यपेन मत्सकाशमृषयः
प्रेरिताः स्युः ।

किं तावद्भूतिनामुपोढतपसां विघ्नैस्तपो दूषितं
धर्मारण्यचरेषु केनचिदुत प्राणिष्वसच्चेष्टितम् ।
आहो स्वित्प्रसवो ममापचरितैर्विष्टम्भितो वीरुधा-
मित्यारूढबहुप्रतर्कमपरिच्छेदाकुलं मे मनः[3] ॥१११॥

[a] अभिनवसम्माजनसश्रीकः सन्निहितहोमधेनुरग्निशरणालिन्दः । आरोहतु देवः ।

Atanushu vibhaveshu=utsaveshu, 'at times of festivity.' *Kukshim-bharibhis taiḥ kim prayojanam*, 'what is the use of these parasitical gluttons as relations?' K. The Calcutta ed. and S. have *saṃvibhaktāḥ* for *santu nāma*. The meaning may certainly be, 'let kinsmen make their appearance (i. e. start up they will on all sides) when there is plenty of property to divide.' K. refers to verse 155, towards the end of Act VI. of this play, *yena yena viyujyante prajāḥ*, &c., 'let it be publicly announced that of whatever dear kinsman his subjects are deprived, Dushyanta will be (in the place of) that (kinsman) to them, the wicked excepted.'

[1] The use of *ete* with 1st pers. pl. of the verb is noticeable, see p. 133, n. 2.

[2] 'The terrace of the fire-sanctuary, with the cow (that yields the ghee) for the oblations close by, is beautiful after its recent purification.' *Sa-śrīka*, lit. 'possessed of the goddess of beauty;' a bold metaphor, used elsewhere by Kālidāsa. *Homa-dhenu, agni-śaraṇa*, see p. 148, n. 1.

[3] 'Has the devotion [penance] of the ascetics, who have collected a store of penitential merit, been frustrated by impediments? or else has any harm been inflicted by any one on the animals grazing in the sacred

---

Verse 111. ŚĀRDŪLA-VIKRĪḌITA (a variety of ATIDHṚITI). See verses 14, 30, 36, 39, 50, 63, 79, 85, 86, 89, 97, 98.

प्रतीहारी ।

[a]सुअरिदणन्दिणो इसीओ देवं सभाजइदुं[1] आअदेत्ति तक्केमि।

॥ ततः प्रविशन्ति गौतमीसहिताः शकुन्तलां पुरस्कृत्य मुनयः । पुरश्चैषां कञ्चुकी पुरोहितश्च ॥

कञ्चुकी ।

इत इतो भवन्तः ।

शार्ङ्गरवः ।

शारद्वत ।

महाभागः कामं नरपतिरभिन्नस्थितिरसौ
न कश्चिद्वर्णानामपथमपकृष्टोऽपि भजते ।
तथापीदं शश्वत्परिचितविविक्तेन मनसा
जनाकीर्णं मन्ये हुतवहपरीतं गृहमिव[2] ॥ ११२ ॥

[a] सुचरितनन्दिन ऋषयो देवं सभाजयितुमागता इति तर्कयामि ।

---

grove? Or is it that the flowering of the creeping plants has been checked [stopped, stunted] through my misdeeds? Thus my mind, in which so many doubtful-conjectures have arisen, is perplexed with an inability to decide.' *Upodha=samprāpta*, K. *Vighnais*, see p. 40, n. 5. *Dharmāraṇya-ćareshu prāṇishu*, cf. p. 13, l. 3. *Āho svit*, used as particles of doubt, see Gram. 717. *h*. *Prasavaḥ*, i.e. *pushpa-phalādi*, 'the flower; fruit, &c.,' K. *Apa-ćaritaiḥ=dur-āćāraiḥ*.

[1] 'To pay homage to.' *Sabhāj* is one of the few dissyllabic roots.

[2] 'Granted that this king eminent-in-virtues [of high parts] swerves not from rectitude; (and that) not one of the classes, (not) even the lowest, addicts itself to evil courses; nevertheless with my mind perpetually familiarized to seclusion I regard this thronged (palace) as a house enveloped in flames.' *Kāmam* occurs frequently in this sense (cf. p. 24, l. 10; p. 55, n. 3). *Abhinna-sthitiḥ=avihata-maryādaḥ*, K.;=*sa-maryādaḥ*, S. *Asau*, so read the Beng. and the Mackenzie MSS.; the others have *aho*. *Varṇānām*, i.e. *brāhmaṇādīnām*. *Apakṛishṭo 'pi*, 'even the lowest (class).' The castes were originally four in number: 1. Brāhmans or priests; 2. Kshatriyas or soldiers; 3. Vaiśyas or merchants and husbandmen; 4. Śūdras or slaves; see p. 84, n. 3. *A-patha*, 'a wrong road,' 'a bad

Verse 112. ŚIKHARIṆĪ (a variety of ATYASHṬI). See verses 9, 24, 44, 62.

शारद्वतः ।

स्थाने भवान्पुरप्रवेशादित्यभ्भूतः संवृत्तः । अहमपि अभ्यक्तमिव स्नातः शुचिरशुचिमिव प्रबुद्ध इव सुप्तम् । बद्धमिव स्वैरगतिर्जनमिह सुखसङ्गिनमवैमि[1] ॥ ११३ ॥

शकुन्तला ॥ निमित्तं सूचयित्वा[2] ॥

[a] अम्महे । किं मे वामेदरं[3] णअणं विप्फुरदि ।

गौतमी ।

[b] जादे । पडिहदं अमङ्गलं । सुहाइं दे भत्तुकुलदेवदाओ वितरन्तु । ॥ इति परिक्रामति ॥

पुरोहितः ॥ राजानं निर्दिश्य ॥

